DHARMASASTRA

ACHARYA 2nd YEAR
Course/Paper-8

# PART - B

# जैमिनीयन्यायमालाविस्तरस्य विंशत्यधिकरणानि

***Jaiminīyanyāyamālāvistarasya Viṃśatyadhikaraṇāni***

राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः
(केन्द्रीयविश्वविद्यालयः)


**CENTER OF DISTANCE & ONLINE EDUCATION**

*(Formerly Directorate of Distance Education)*

**NATIONAL SANSKRIT UNIVERSITY :: TIRUPATI-517 507 (A.P)**

*(Erstwhile Rashtriya Sanskrit Vidyapeetha, Tirupati)*

# दूरशिक्षापाठ्यक्रमः, आचार्यप्रथमवर्षम् , धर्मशास्त्रम्

अष्टमपत्रम् – ख) जैमिनीयन्यायमालाविस्तरः- पूर्णाङ्काः – 50

द्वितीयभागः (UNIT-VI to UNIT-X )

----------------------------------------------------

## आमुखम् –

जैमिनीयन्यायमालाख्यग्रन्थस्य रचयिता माधवाचार्य्यः दाक्षिणात्यनिबन्धकारेषु प्रमुखं स्थानं भजते।स च भरद्वाजगोत्रीयो बौधायनशाखाध्यायी कृष्णयजुर्वेदीयब्राह्मण आसीत् । तस्य पितुर्नाम मायणाचार्य्यः मातुर्नाम च श्रीमती । द्वयोः भ्रात्रोः नाम सायणो भोगनाथश्चेति पराशरमाधवीयाद् ज्ञायते । यथोक्तं तत्र –

श्रीमती जननी यस्य सुकीर्त्तिर्मायणः पिता ।
सायणो भोगनाथश्च मनोबुद्धी सहोदरौ ।।
यस्य बौधायनं सूत्रं शाखा यस्य च याजुषी ।
भारद्वाजं कुलं यस्य सर्वज्ञः स हि माधवः ।। इति ।।

निखिले दाक्षिणात्ये आदिशङ्कराचार्यानन्तरं माधवाचार्यस्य नाम प्रसिद्धमस्ति । तेन संस्कृतवाङ्मयस्य सर्वासु शाखासु प्रामाणिका ग्रन्था विरचिताः । माधवाचार्यः विद्यारण्यनाम्ना प्रथित आसीत् ।विद्यारण्यनाम्नाभिहितो माधवाचार्यः सन्यासमवलम्ब्य श्रृङ्गेरीपीठे स्थितः । स माधवाचार्यनाम्ना यथा प्रसिद्धः तथा सन्यासित्वेनापि प्रसिद्धः । माधवाचार्यः प्रचण्डो विद्वान् आसीत् । तस्य प्रभावेण तस्य भ्राता सायणाचार्यः वैदिकसंहितादिषु ग्रन्थेषु भाष्यं टीकां च विरचितवान् । " कृपालुमाधवाचार्य्यो वेदार्थं वक्तुमुद्यतः " इति वचनात् केचन वदन्ति यत् वस्तुतः वेदभाष्यं न माधवाचार्येण प्रणीतं किन्तु ज्येष्ठे भ्रातरि तस्य भक्त्यतिशयात् तेन सर्वे ग्रन्था माधवीयतया निर्द्दिष्टाः।सायणो माधवाचार्यस्यानुजस्य नाम वंशनामाप्यासीत् ।यतो हि माधवीय- धातुवृत्तौ "यस्य मन्त्री शिखारत्नमस्ति मायणसायणः"इत्यादिना मायणस्य सायणतयोल्लेखः वंशनामत्वं बोधयति । पुनश्च तत्कृतसर्वदर्शनसंग्रहग्रन्थाद् ज्ञायते यत् –

श्रीमत्सायणदुग्धाब्धिकौस्तुभेन महौजसा ।
क्रियते माधवार्येण सर्वदर्शनसंग्रहः ।। इति ।।

भोगनाथेनापि रामोल्लासत्रिपुरविजय-उदाहरणमालादिग्रन्थाः विरचिताः ।

ख्रीष्टीयत्रयोदशशतकादनन्तरं दक्षिणभारते धार्मिकसंप्रदायेषु महान् कलहः समुत्पन्नः। एतस्मिन् समये शङ्कराचार्यः,माधवाचार्यः,रामानुजाचार्यः,लिङ्गायतः,जैना इत्येतानुपजीव्य सांप्रदायिक-धार्मिकमतवादेषु सामाजिकं तारतम्यमपि प्रादुरभूत् । सायणाचार्यस्य वेदभाष्यं, माधवाचार्यस्य पराशरमाधवीयम् ,कालमाधवश्चेति ग्रन्थत्रयं क्षेत्रस्यास्य साम्प्रदायिककलहस्य प्रभावमुररीकृत्य प्रणीतमिति प्रतिभाति ।विजयनगरवासिविद्यारण्यमाधवाचार्यप्रणीतकालमाधवग्रन्थस्य कारिकातः ज्ञायते यत् विद्यातीर्थः,भारतीतीर्थः,श्रीकण्ठश्चेति नामभिस्तस्य त्रयो गुरव आसन् । माधवा-चार्य्यप्रमुखाः सर्वे भ्रातरः बुक्कस्य, हरिहरस्य, कम्पस्य, सङ्गमस्य च मन्त्रिणः राजगुरवश्चासन् । माधवाचार्यः बुक्कस्य बुक्कणस्य वा राज्ञः कुलगुरुः मन्त्री चासीत् । तदनन्तरं स हरिहरस्यापि मन्त्र्यभूत् ।मायणस्तु सङ्गमस्य मन्त्र्यासीत् ।प्रसङ्गेऽस्मिन् स्पष्टतया प्रतिपादितं माधवीयधातु- वृत्तौ यत् -

अस्ति श्रीसङ्गमक्ष्मापः पृथ्वीतलपुरन्दरः ।
तस्य मन्त्री शिखारत्नमस्ति मायणसायणः ।।इति ।।

पुनश्च माधवाचार्य्येण “ सोऽहं प्राप्य विवेकतीर्थपदवी ”मित्यादौ कालमाधव-स्योपोद्घातप्रकरणे प्रतिपादनात् तेन विवेकतीर्थ इत्युपाधिर्लब्धः इति ज्ञायते ।

विद्यारण्यश्रीचरणेन श्रीमाधवाचार्येण स्वीयकृतिषु भोजराज-वाचस्पतिमिश्र-कालादर्श-तत्त्वप्रकाश-हेमाद्यादीनां नाम्नामुद्धरणात् स एतेषां परवर्त्तीति । पुनश्च निर्णय-सिन्धु-कालदीप-कालसारादिषु ग्रन्थेषु माधवाचार्यस्य नामोट्टङ्कनात् स एतेषा पूर्ववर्त्तीत्य-नुमीयते । अपि च 1347 तमे ख्रीष्टाब्दे माधवाचार्यो वनवासिराज्ये मारप्पमहाराजस्य मन्त्री आसीत् । स 1356 ख्रीष्टाब्दे वाराणसीं प्रति गतः । गुरोस्तु भारतीतीर्थस्यादेशेन विजयनगरं गत्वा प्रायशः 1368 तमे संवत्सरे स माधवाचार्यः प्रथमवुक्कराज्यस्य प्रधानमन्त्री (महाप्रधानः) अभवत् ।1380 ख्रीष्टाब्दे स जगद्गुरुसंज्ञया संज्ञितोऽभूत् । 1384 तमे ख्रीष्टाब्दे तस्य शिक्षया द्वितीयो हरिहरः महाराजोऽनुप्राणीतः । 1386 तमे ख्रीष्टाब्दे स हाम्पीनगरे दिवं जगामेति ऐतिहासिकाः प्रतिपादयन्ति ।अतस्तस्य कालः 1330 ख्रीष्टाब्दतः 1385 ख्रीष्टाब्दमध्ये भवेदिति धर्मशास्त्रेतिहासकाराणामभिप्रायः ।

सकलशास्त्रावगाहिमाधवाचार्येण संस्कृतसाहित्यस्य विभिन्नासु शाखासु विभिन्ना ग्रन्था विरचिताः ।अनेन माधवाचार्येण पराशरमाधवीयं,कालमाधवः,जीवन्मुक्तिविवेकः,पञ्चदशी , जैमिनीयन्यायमालाविस्तरः ,वैयासिकन्यायमालविस्तरः, सर्वदर्शनसंग्रहः,पुराणसारः, अनुभूति-प्रकाशश्चेति बहवः प्रामाणिका विशिष्टाश्च ग्रन्था विरचिताः ।माधवाचार्यो यदा संन्यासी संजात-स्तस्यामवस्थायां स जीवन्मुक्तिविवेकं पञ्चदशीञ्च प्रणीतवान् । प्रसङ्गेऽस्मिन् जैमिनीयन्याय-

मालायां प्रतिपादितं यत् –

> निर्माय माधवाचार्य्यो विद्वदानन्ददायिनीम् ।
> जैमिनीयन्यायमालां व्याचष्टे बालबुद्धये ।।
> श्रुतिस्मृतिसदाचारपालको माधवो बुधः ।
> स्मार्त्तं व्याख्याय सर्वार्थं द्विजार्थं श्रौतमुद्यतः ।।इति ।।

एतेन ज्ञायते यन्माधवाचार्य्येण नानाग्रन्थेषु जैमिनीयन्यायमालाग्रन्थोऽपि विरचितः। स च ग्रन्थःपूर्वमीमांसाशास्त्रसम्बन्धीति नात्र काचित् संशितिः । एतावता माधवाचार्यस्य समग्र-वेदभाष्यविरचनेन सह बहुशास्त्रपारङ्गतत्वं प्रतीयते ।

## अष्टमपत्रम् – ख) जैमिनीयन्यायमालाविस्तरः– 50

## UNIT-VI (षष्ठखण्डः) विधेः स्वतः प्रामाण्याधिकरणम् , वेदप्रामाण्याधिकरणम् , अर्थवादप्रामाण्याधिकरण् , स्मृतिप्रामाण्याधिकरणञ्च ।

### VI–1 प्रस्तावना

मीमांसा खलु व्याक्यविचारशास्त्रम् ।श्रौतस्मार्त्तवाक्यानां सम्यगर्थबोधः मीमांसा-शास्त्राश्रयं विना नैव भवितुमर्हति । द्वादशाध्यायैः महर्षिणा जैमिनिना पूर्वमीमांसाशास्त्रं सूत्रैरेव प्रणीतम् । तत्रत्यान् विषयान् स्वीकृत्य माधवाचार्येण श्लोकैः जैमिनीयन्यायमालानामको ग्रन्थो विरचितः । ततश्च स स्वयमेव तेषां श्लोकानां व्याख्यानं विस्तरशः व्यदधात् ,यो जैमिनीयन्यायमालाविस्तर इति नाम्ना प्रसिद्धो-ऽभूत् ।तस्मिन् ग्रन्थे विद्यमानेषु द्वादशाध्यायेषु आहत्य (907)सप्तोत्तरनवशतसंख्यकान्यधिकरणानि सन्ति । तत्रत्या विचार्य्यविषया विषय–संशय–पूर्वपक्षो–त्तरपक्षैश्चतुर्भिः क्रमवृत्तिभिः प्रायशः श्लोकद्वयेनैव प्रति- पादिताः । तत्रापि प्रथमश्लोके विषयस्य संशयमुत्थाप्य तत्र हेतूपन्यासपूर्वकं पूर्वपक्ष उपस्थापितः।ततश्च श्लोकान्तरेणोत्तरपक्षः सिद्धान्तरूपेणोपस्थापितः ।

मीमांसासिद्धान्तपरम्परायां सम्प्रदायद्वयं प्रामुख्येन दृष्टिपथारूढं भवति । भाट्ट-सम्प्रदायः गुरुसम्प्रदायश्चेति । भाट्टसम्प्रदायस्य प्रवर्त्तकः आचार्यकुमारिलभट्टः। गुरुसम्प्रदायस्य प्रवर्त्तकश्च आचार्यप्रभाकरगुरुः । तयोर्मध्ये बहुषु क्षेत्रेषु मतभेदो दृश्यते । यतो हि भाट्टसम्प्रदाया अभिहितान्वयवादिनः गुरुसम्प्रदायाश्चान्विताभिधानवादिनो भवन्ति ।अर्थात् भाट्टमते पूर्वमभिहितानां पदानां पश्चादन्वयः,गुरुमते च पदैरन्वितानामर्थानां पश्चादभिधानम् ।तस्मादेव मतपार्थक्यं परिलक्ष्यते । एतयोर्द्वयोरपि मतयोर्भिन्नमता-वलम्बी भवति मुरारिमिश्रः,“मुरारेस्तृतीयपन्थाः”इति वचनात् ।जैमिनीयन्यायमालाग्रन्थस्य विस्तरे माधवा-चार्येण या वृत्तिर्विरचिता तत्र प्रायशः सर्वेष्वधिकरणेषु भाट्टमतमेवानुसृतम् । क्वचित् स्थलविशेषे भाट्टमतेन सह

गुरुमतमपि प्रदत्तम् । ग्रन्थेऽस्मिन् द्वादशाध्यायाः सन्ति । प्रत्यध्यायश्च चत्वारःपादाः,प्रति पादश्च कानि-चिदधिकरणानि सन्ति । ग्रन्थस्यास्य मुद्रणं यूरोपदेशे कलिकतानगरे ,आनन्दाश्रममुद्रणालये च सञ्जातम् । अस्य ग्रन्थस्य प्रथमाध्याये धर्मे प्रामाण्यनिरूपणम् ,द्वितीयाध्याये यागदानादिकर्मभेदविचारः, तृतीयाध्याये प्रयाजादीनां दर्शपूर्णमासाङ्गत्वविचारः,चतुर्थाध्याये गोदोहनस्य पुरुषार्थत्वप्रयुक्तिविचारः,पञ्चमाध्याये क्रम-विचारः,षष्ठाध्याये कर्त्तुरधिकारविचारः,सप्तमाध्याये सामान्यातिदेशविचारः,अष्टमाध्याये विशेषातिदेशविचारः, नवमाध्याये ऊहविचारः,दशमाध्याये बाधविचारः,एकादशाध्याये तन्त्रविचारः, द्वादशाध्याये च प्रसङ्गविचारः उपस्थापितः । माधवाचार्यप्रणीतजैमिनीयन्यायमालाविस्तराख्यग्रन्थस्य समग्रेषु ९०७ अधिकरणेषु पाठ्येऽत्र केवलं विंशत्यधिकरणानि विद्यन्ते । केवलं तेषामधिकरणानां चर्चाऽत्र क्रियते ।

## VI.2 उद्देश्यम्

प्रियपाठकाः ! अस्मिन् खण्डे भवन्तः चत्वारि अधिकरणानि आलोचयिष्यन्ति ।

- विधेः स्वतः प्रामाण्याधिकरणमालोचयिष्यन्ति ।
- वेदप्रामाण्याधिकरणमत्र विचारयिष्यन्ति ।
- वेदवाक्यस्य प्रामाण्यं प्रतिपादयिष्यन्ति ।
- अर्थवादप्रामाण्याधिकरणं प्रदर्शयितुमर्हन्ति ।
- अर्थवादानां भेदान् सोदाहरणं निरूपयिष्यन्ति ।
- स्मृतिप्रामाण्याधिकरणं प्रतिपादयिष्यन्ति ।

## VI.3 विधेः स्वतः प्रामाण्याधिकरणम् ( 1 – 1 – 5 )

**अबोधको बोधको वा न तावद्बोधको विधिः ।**
**शक्तेरलौकिके धर्मे ग्रहणं दुर्घटं यतः ।।**
**समभिव्याहृते धर्मे शक्तिग्रहणसम्भवात् ।**
**बोधकस्य विधेर्मात्वमनपेक्षतया स्थितम् ।।**

एतच्छ्लोकद्वयं माधवाचार्यप्रणीतस्य जैमिनीयन्यायमालाविस्तराख्यग्रन्थस्य प्रथमाध्यायस्थित-प्रथमपादस्य पञ्चममधिकरणम् । प्रत्यधिकरणमिवास्मिन्नप्यधिकरणे विषय-संशय-पूर्वपक्ष-सिद्धान्त इति क्रमवृत्तिभिः विधेः स्वतः प्रामाण्यं विवेचितम् । अत्र **विषय**स्तावत् - विधेः स्वतः प्रामाण्यप्रतिपादनम् । तत्र संशयो भवति यत् -विधिः बोधकोऽबोधको वेति । प्रसङ्गेऽस्मिन् **पूर्वपक्षो** वदति यत् -विधिर्न बोधक इति । यतो हि शब्दे शक्तिग्रहं विनाऽर्थबोधो न सम्भवति । लोके वृद्धव्यवहारादिना गवादिशब्दे शक्तिर्गृह्यते । विधे-रलौकिकत्वात् तत्र शक्तिग्रहणं दुर्घटम् । तस्मात् विधिः न बोधकः इति । अत विधेः धर्मे प्रामाण्यं नास्ति।

अत्र सिद्धान्तवादिनोऽयमेवाभिप्रायो यत् –लोके शक्तिग्रहस्य कृते नाना व्यवस्था विद्यन्ते । प्रसङ्गेस्मिन्नुक्तं यत् -

शक्तिग्रहं व्याकरणोपमान–कोषाप्तवाक्याद् व्यवहारतश्च ।
वाक्यस्य शेषाद्विवृत्तेर्वदन्ति सान्निध्यतः सिद्धपदस्य वृद्धाः ।। इति ।।

एतेन ज्ञायते यत् व्याकरणोपमानकोषाप्तवाक्यवृद्धव्यवहारविवृत्तिसिद्धपदस्य सान्निध्यादि–द्वारा लौकिकपदानां शक्तिग्रहणं क्रियते । यथा सिद्धपदस्य सान्निध्यात् 'प्रभिन्नकमलोदरे मधूनि मधुकरः पिबति 'इत्यादौ मधुकरपदस्यार्थमजानन्नप्यन्यपदस्यार्थमवगत्य तत्समभिव्याहारात् कमलमध्यगते मधुपानं कुर्वति दृश्यमाने भ्रमरे मधुकरशब्दस्य सङ्गतिं गृहीत्वा वाक्यार्थोऽवबुध्यते ,तथा वैदिकोदाहरणे ' कारीर्य्या वृष्टिकामो यजेत' इत्यादौ लोकप्रसिद्धवृष्ट्यादिपदसमभिव्याहारात् अलौकिकभावनायां विधेः सङ्गतिं गृहीत्वा विधिवाक्यास्यार्थं पुरुषो बुध्यते । तेन विधेर्बोधकत्वं नास्तीति न । अतः विधेः स्वतः प्रामाण्यं कथञ्चिद–प्यपह्नोतुं न शक्यते । अतो विधिः बोधकः, तस्य च प्रमाण्यं स्वतः विद्यत इति **सिद्धान्तः** ।

### बोधप्रश्नाः

1. विधेः स्वतः प्रामाण्यमस्ति न वा ?
   -----------------
2. के शक्तिग्रहस्योपायाः ?
   ------------------
3. अस्मिन्नधिकरणे कः पूर्वपक्षः ?
   ------------------
4. विधिः बोधकोऽबोधको वा ? कः सिद्धान्तपक्षः ?
   ------------------

## VI.4 वेदप्रामाण्याधिकरणम् (1-1-7)

वेदवाक्यममानं स्यान्मानं वा नास्य मानता ।
पृथक्सङ्केतवीक्षायामनपेक्षत्ववर्जनात् ।।
वेदेऽपि लोकवन्नैव वाक्यार्थसङ्गतिः पृथक् ।
ग्रहीतव्यं ततो वाक्यप्रमाणं नैरपेक्षतः ।। इति ।।

एतेन श्लोकद्वयेन जैमिनीयन्यायमालाविस्तराख्यग्रन्थस्य प्रथमाध्यायस्थित–प्रथमपादस्य सप्तमाधिकरणं प्रतिपादितम् । अत्र **विषयः** वेदवाक्यस्य प्रामाण्यप्रतिपादनम् । किन्तु वेदवाक्यं प्रमाणं न वेति **संशयः** ।तथा सति वेदवाक्यं न प्रमाणमिति **पूर्वपक्षः**। यतो हि लौकिकपदे सङ्केतग्रहणात्

लौकिकपदसमुच्चयरूपस्य वाक्यस्यार्थबोधो भवति ।वैदिकपदे पृथक्सङ्केतग्रहस्यावश्यकत्वात् वेदस्य कारण-सापेक्षत्वं नास्ति। यथा'अग्निहोत्रं जुहुयात् स्वर्गकाम 'इत्यादिवाक्यस्य वाक्यार्थे सङ्गतिग्रहणमपेक्षितम् ।अतो नैरपेक्ष्याभावात् वेदवाक्यस्य प्रामाण्यं नास्ति । एवं पूर्वपक्षेणोपन्यस्ते सिद्धान्तवादिना प्रतिपाद्यते यत् -लोके गामानय इत्यादिपदप्रयोगेषु पदपदार्थयोरेव सङ्गतिर्गृह्यते । वस्तुतः आकाङ्क्षायोग्यतासन्निधिवशात् वाक्य ं यथा लौकिकं वाक्यं स्वार्थं बोधयति तथा वेदवाक्यस्याप्यर्थबोधकत्वात् निरपेक्षत्वेन वेदवाक्यस्यापि प्रामाण्यं विद्यते । एतेन वेदवाक्यस्य पृथक्सङ्गत्यभावात् लौकिकवाक्यवत् प्रामाण्यं विद्यते । अतो वेदवाक्यं प्रमाणमति **सिद्धान्तः** ।

### बोधप्रश्नाः

1. वेदवाक्यस्य प्रामाण्यमस्ति न वा ?
   -----------------
2. वाक्यस्य किं लक्षणम् ?
   ------------------
3. लोकिकवाक्यवद् वेदवाक्ये सङ्केतो गृह्यते न वा ?
   ------------------
4. अस्मिन्नधिकरणे पूर्वपक्षः किं वदति ?
   ------------------

## VI.5 अर्थवादप्रामाण्याधिकरणम् - (1-2-1)

वायुर्वा इत्येवमादेरर्थवादस्य मानता ।
न विधेयेऽस्ति धर्मे किं किंवाऽसौ तत्र विद्यते ।।
विध्यर्थवादशब्दाभ्यां मिथोऽपेक्षापरिक्षयात् ।
नास्त्येकवाक्यता धर्मे प्रामाण्यं सम्भवेत्कुतः ।।
विध्यर्थवादौ साकाङ्क्षौ प्राशस्त्यपुरुषार्थयोः ।
तेनैकवाक्यता तस्माद्वादानां धर्ममानता ।।

श्लोकत्रयात्मकमिदमधिकरणं जैमिनीयन्यायमालाविस्तराख्यग्रन्थस्य प्रथमाध्यायस्थित-द्वितीयपादस्य प्रथमाधिकरणम् । अत्र अर्थो नाम प्रयोजनम् ।अर्थाय वादः अर्थवादः। स च विधेः पुच्छभूतः । अर्थवादवाक्यस्य स्वतन्त्रतया प्रामाण्यं नस्ति ; विध्येकवाक्यतयैव तस्य प्रामाण्यात् ।' वायुर्वै क्षेपिष्ठा देवता वायुमेव स्वेन भागधेयेनोपधावति ।स एवैनं भूतिं गमयति'इत्यर्थवादवाक्यम् ।एतच्च 'वायव्यं श्वेतमालभेत भूतिकाम' इत्यस्य विधिवाक्यस्याङ्गम् ।यो भूतिं कामयते स वायुदेवताकं श्वेतछागद्रव्यकं यागं कुर्यादिति वाक्यस्यार्थः। भूतिप्राप्तये वायुदेवताकयागकरणार्थमधिकाधिकतया यजमानस्य प्रवृत्तिमुत्पादयितुं वायुदेवतायाः

प्रशंसा कृता ।तद्यथा– वायुरत्यन्तक्षिप्रगामी स स्वोचितेन भागेन तोषितः भागप्रदाय ऐश्वर्य्यं प्रयच्छति ।अतोऽयं प्रशंसारूपोऽर्थवादः । यस्य भूतिकामना नास्ति तस्य कृते प्रंशसारूपोऽर्थवादः निरर्थकः। तस्मादर्थवादः विधेरङ्गभूतः पुच्छभूतः शेषभूतो वेत्युच्यते ।

अस्मिन्नधिकरणे धर्मेऽर्थवादस्य प्रामाण्यमिति **विषयः** ।तत्र **संशयो** यत् वायुर्वै क्षेपिष्ठा देवतेत्याद्यर्थवादवाक्यस्य धर्मे प्रामाण्यमस्ति न वेति । प्रसङ्गेऽस्मिन् **पूर्वपक्षो** वदति यत् विधिवाक्याऽर्थ–वादवाक्ययोः प्रयुक्तानां पदानां परस्परमाकाङ्क्षाभावादेकवाक्यताभावाच्च धर्मेऽर्थवादस्य प्रामाण्यं नास्तीति । परन्तु नैतत् समीचीनम् । यतो हि यद्यपि विधिवाक्याऽर्थवादवाक्यस्थितपदानां मध्ये परस्परमेकवाक्यता नास्ति ,तथापि वाक्यैकवाक्यता विद्यते । तत्र विधिवाक्यं तावत् पुरुषं प्रेरयितुं विधेयभूतस्य धर्मस्य प्राशस्त्यमपक्षते ।अर्थवादवाक्यञ्च फलवदर्थावबोधपर्यवसितपुरुषार्थमपेक्षते । तस्मादर्थवादवाक्यं विधि–वाक्येन सह एकवाक्यतामाप्यते । यतः वायुः क्षीप्रगामी स स्वभावतः शीघ्रफलप्रद एव ।अस्य वायोर्देवता श्वेतपशुः। पशुसामान्येनात्र छाग एव बोध्यते ।अतः वायुदेवताकश्वेतछागद्रव्यकयागकरणेन भूतिः प्राप्यत इति वाक्ययोरन्वयः । तस्मादर्थवादो धर्मे प्रमाणमिति **सिद्धान्तः** ।

अस्मिन्नधिकरणे माधवचार्येण प्रभाकरगुरोर्मतमप्युपस्थापितम् । तन्मते यतो वायुः क्षिप्रमेव फलप्रदः तस्माद्वायव्यं श्वेतमालभेतेत्यत्र अर्थवादोक्तहेतुमपेक्ष्य विधिः पुरुषं नियुङ्क्ते । ततः सापेक्ष्यत्वात् अप्रामाण्यमिति **पूर्वपक्षः** । तत्र फलप्रददेवतायुक्तत्वात् राजसेवादिवदित्यनुमानं यदि अर्थवादे विवक्ष्यते,तर्हि आगमप्रमाणस्य प्रमाणान्तरसापेक्षत्वं स्यात् । तत्तु न विवक्षितम् । किन्तु फलप्रददेवता–तोषकत्वोपन्यासमुखेन कर्मप्राशस्त्यमुपलक्ष्यते । तथा सति प्रशस्तं कर्मानुष्ठेयमिति अस्मिन्नर्थे अर्थवाद–सहितस्य विधेः पर्यवसानादेकवाक्यता लभ्यते । तस्मादर्थवादानां धर्मे प्रामाण्यमस्तीति **सिद्धान्तः** ।

### बोधप्रश्नाः

1. अर्थवादवाक्यस्य धर्मे प्रामाण्यमस्ति न वा ?
   -----------------
2. अस्मिन्नधिकरणे विधिवाक्यं किम् ?
   -----------------
3. वायव्यं श्वेतमित्यत्र श्वेतपदेन कं बोध्यते ?
   -----------------
4. विधिवाक्यार्थवादयोः कथमेकवाक्यता ?
   -----------------

## VI.6 **स्मृत्यधिकरणम् –** (1-3-1)

अष्टकादिस्मृतेर्धर्मे न मात्वं मानताऽथवा ।

निर्मूलत्वान्न मानं सा वेदार्थोक्तौ निरर्थता ।।
वैदिकैः स्मर्यमाणत्वात् सम्भाव्या वेदमूलता ।
विप्रकीर्णार्थसंक्षेपात् सार्थत्वादस्ति मानता ।।

स्मृतिर्नाम मन्वादिप्रणीतं धर्मशास्त्रम् ।तस्याः प्रामाण्यप्रतिपादनं **विषयः** ।तत्र **संशयो** भवति यत् 'अष्टका कर्त्तव्या 'इत्यादि स्मृतिवाक्यं धर्मे प्रमाणं न वेति । अष्टका नाम हेमन्तशिशिरयोः ऋत्वोः कृष्णपक्षाष्टमीषु क्रियमाणं पितृश्राद्धमष्टकाशब्देनोच्यते ।तस्य श्राद्धस्य कर्त्तव्यता मन्वादिस्मृतिषु प्रतिपादिता। अतः,तद्वाक्यस्य मन्वादिपुरुषप्रयुक्तत्वेन ,अपौरुषेयत्वाभावात् मूलभूतवेप्रमाणराहित्यं बोध्यते । यदि तस्य वाक्यस्य मूलप्रमाणवत्ता विद्यते तर्हि वेदार्थ एव स्मृतिभिरुच्यते । यदि वेदादेव तदर्थज्ञानं तर्हि स्मृतिः निरर्थकैव । यतो हि तस्या वेदानुवादकत्वादप्रामाण्यमिति **पूर्वपक्षः** । अष्टका कर्त्तव्येत्यादिवाक्यस्य मन्वादि-वैदिकस्मृतिप्रणीतत्वेन वैयर्थ्याभावात् तद्वाक्यस्य वेदमूलता सम्भाव्यते । अतः प्रत्यक्षेषु परोक्षेषु नानावेदेषु विप्रकीर्णत्वेन प्रतिपादितस्यार्थस्य संक्षिप्य स्मृतिषु एकत्र संग्रहदर्शनात् स्मृतेः प्रामाण्यं धर्मे विद्येत इति **सिद्धान्तः** ।

अस्मिन्नधिकरणे माधवचार्येण प्रभाकरगुरोर्मतमप्युपस्थापितम् ।तन्मते 'यां जनाः प्रतिनन्दन्ति' इत्ययं मन्त्रः अष्टकाश्राद्धस्याङ्गम् । तच्च श्राद्धं स्मार्त्तम् ।तत्प्रतिपादकं वेदवाक्यं नोपलभ्यते ।तस्मादिदं मन्त्रवाक्यं धर्मे न प्रमाणमिति **पूर्वपक्षः** । परन्तु तत्रोच्यते यत् -तन्न समीचीनं ,तन्मूलस्य वेदस्यानुमेयत्वात्। तस्मादसौ मन्त्रः धर्मे प्रमाणम् इति **सिद्धान्तः** ।

### बोधप्रश्नाः

1. स्मृतिशब्देन किं बोध्यते ?
   -----------------
2. का नाम अष्टका ?
   ------------------
3. अष्टकायां किं क्रियते ?
   --------------------
4. धर्मे स्मृतिवाक्यस्य कथं प्रामाण्यम् ?
   ------------------
5. अस्निन्नधिकरणे गुरुमतं किम् ?
   ------------------

## VI.7 सारांशः

अस्मिन् खण्डे चत्वारि अधिकरणानि प्रतिपादितानि । तानि विधेः स्वतः

प्रामाण्याधिक रणम् , वेदप्रामाण्याधिकरणम् ,अर्थवादप्रामाण्याधिकरणम् , स्मृतिप्रामाण्यधिकरणश्चेति ।तत्र प्रत्यधिकरणं विषय-संशय-पूर्वपक्ष-सिद्धान्तश्च पृथक् पृथक् स्पष्टतया माधवाचार्योक्तदिशा प्रतिपादिताः । एतेषु चतुर्षु अधिकरणेषु वेदप्रामाण्याधिकरणे ,अर्थवादप्रामाण्याधिकरणे ,स्मृतिप्रामाण्यधिकरणे च भाट्ट- मतेन सह गुरुमतमप्युपन्यस्तम् ।

## VI.8 पारिभाषिकशब्दाः

अर्थवादः - विधिपुच्छभूतः तत्प्रशंसानिन्दात्मको वाक्यविशेषः
अष्टका - हेमन्तशिशिरयोः ऋत्वोः कृष्णपक्षाष्टमीषु क्रियमाणं पितृ-श्राद्धम्
पुरुषार्थाः - धर्मार्थकाममोक्षाः
मानं - प्रमाणम्
यागः - देवतोद्देश्येन द्रव्यत्यागः
विधिः - अप्राप्तप्रापणरूपं विधायकं वाक्यम्
वाक्यं - पदसमुच्चयं यदाकांङ्क्षायोग्यतासन्निधिवशादुपपद्यते
वेदः - नित्योऽक्षरराशिः
शक्तिग्रहणम् -व्याकरणोपमानादयः शक्तिग्रहोपायाः
श्राद्धम् - पित्रुद्देश्येन श्रद्धयाऽदनीयस्य द्रव्यस्य त्यागः
स्मृतिः - मन्वादिप्रणीतं धर्मशास्त्रम्

## VI.9 **सहायकग्रन्थाः**

1.मीमांसादर्शनम् शावरभाष्यसहितम्

2.मीमांसान्यायप्रकाशः- आपदेवकृतः

3.पूर्वमीमांसाधिकरणकौमुदी-रामकृष्णभट्टाचार्यकृता

4.मीमांसापरिभाषा -कृष्णयज्वविरचिता

5.अर्थसंग्रहः - लौगाक्षिभास्करविरचितः

## VI.10 आदर्शप्रश्नाः

### निबन्धात्मकप्रश्नाः (प्रत्येकं 20/15 अङ्काः )

१) माधवाचार्यस्य परिचयं प्रदाय तस्य देशकालकृतीः प्रदर्शयत ।
२) वेदप्रामाण्याधिकरणं माधवोक्तशि प्रतिपादयत ।

३) विधेः स्वतः प्रामाण्यमस्ति न वेति विचारयत ।
४) अर्थवादानां प्रामाण्यं माधवोक्तदिशा प्रतिपादयत ।
५) अष्टकादिस्मृतेः कथं प्रामाण्यं तद् विचारयत ।

## विश्लेषणात्मकप्रश्नाः (प्रत्येकं 12/10 अङ्काः )

१) जैमिनीयन्यायमालाविस्तरग्रन्थस्य वैशिष्ट्यं प्रतिपादयत ।
२) वेदवाक्यस्य प्रामाण्यं प्रतिपादयत ।
३) अर्थवादानां प्रामाण्यं संक्षेपेण प्रदर्शयत ।
४) जैमिनीयन्यायमालाविस्तरे प्रत्यधिकरणं कथं श्लोकैरुपस्थापितं तद् विचारयत ।
५) 'वायव्यं श्वेतमालभेत भूतिकाम ' इति वाक्यस्य तात्पर्यमालोचयत ।
६) स्मृत्यधिकरणं विशदयत ।

## लघुप्रश्नाः (प्रत्येकं 5 अङ्काः )

१) विधेः कथं प्रामाण्यं तत् प्रतिपादयत ।
२) किं नाम प्राशस्त्यम् ?
३) का नाम अष्टका ?
४) शक्तिग्रहस्य के उपायाः ?
५) अर्थवादस्य स्वरूपं प्रतिपादयत ।

## एकाङ्कप्रश्नाः (प्रत्येकं 1 अङ्कः)

१) विधेः स्वतः प्रामाण्यमस्ति न वा ?
२) विधिः बोधकोऽबोधको वा ? कः सिद्धान्तपक्षः ?
३) अर्थवादवाक्यस्य धर्मे प्रामाण्यमस्ति न वा ?
४) वायव्यं श्वेतमित्यत्र श्वेतपदेन कं बोध्यते ?
५) स्मृतिशब्देन किं बोध्यते ?
६) अष्टकाशब्दस्य कोऽर्थः ?
७) वेदवाक्यस्य प्रामाण्यमस्ति न वा ?
८) वाक्यस्य किं लक्षणम् ?
९) लौकिकवाक्यवद् वेदवाक्ये सङ्केतो गृह्यते न वा ?
१०) जैमिनीयन्यायमालाविस्तरः केन विरचितः ?
११) जैमिनीयन्यायमालाविस्तरे कति अध्यायाः सन्ति ? ?
१२) भाट्टमतस्य कः प्रवर्त्तकः ?
१३) गुरुमतस्य कः प्रवर्त्तकः ?

१४) क्षेपिष्ठा इत्यस्य कोऽर्थः ?
१५) वायव्यं श्वेतमालभेतेत्यत्र का देवता ?
१६) पूर्वमीमांसाशास्त्रं केन विरचितम् ?
१७) भूतिकाम इत्यस्य कोऽर्थः ?
१८) स्मृतेर्वेदमूलता विद्यते न वा ?
१९) जैमिनीयन्यायमालाविस्तरे कति अधिकरणानि सन्ति ?
२०) जैमिनीयन्यायमालाविस्तरे प्रत्यधिकरणं कति अवयवाः सन्ति ?

## VI-11 एकाङ्कप्रश्नानामुत्तराणि

१) अस्ति

२) बोधकः

३) अस्ति

४) श्वेतछागः

५) धर्मशास्त्रम्

६) हेमन्तशिशिरयोः ऋत्वोः कृष्णपक्षाष्टमीषु क्रियमाणं पितृश्राद्धम्-

७) अस्ति

८) पदसमुच्चयो वाक्यम्

९) गृह्यते

१०) माधवाचार्य्येण

११) द्वादश

१२) कुमारिलभट्टः

१३) प्रभाकरगुरुः

१४) क्षिप्रगामी

१५) वायुः

१६) जैमिनिना

१७) ऐश्वर्य्यकामः

१८) विद्यते

१९) ९०७

२०) चत्वारः

# UNIT-VII (सप्तमखण्डः) विरोधाधिकरणम् , आचारप्रामाण्याधिकरणम् , होलाकाधिकरणम् , आकृत्यधिकरणम्

## VII.1 **प्रस्तावना**

जैमिनीयन्यायमालाविस्तरस्य चत्वार्य्येवाधिकरणानि अत्र विचार्यन्ते ।प्रत्यधिकरणं विषय-संशय-पूर्वपक्ष-सिद्धान्त इति चतुर्भिः क्रमवृत्तिभिः विचारो माधवाचार्येणोपस्थापितः । तत्र विरोधाधिकरणे श्रुतिस्मृत्योर्विरोधे श्रुतेः प्राबल्यं प्रतिपादितम् ।आचारप्रामाण्याधिकरणे देशाचारस्य प्रामाण्य- प्रतिपादनं कृतम् । ततः होलाकाधिकरणे वसन्तोत्सवस्य पूर्वदेशीयाचारत्वेन प्रतिपादनं कृत्वा तत आकृत्यधिकरणे आकृत्या शब्दार्थग्रहणं कर्त्तव्यमिति माधवाचार्य्येण प्रतिपादितम् ।

## VII.2 **उद्देश्यम्**

प्रियपाठकाः ! अस्मिन् खण्डे भवन्तः अधोलिखितान् विन्दून् आलोचयिष्यन्ति ।

- विरोधाधिकरणे स्मृतेरपेक्षया श्रुतेः प्राबल्यं विचारयिष्यन्ति ।
- होलाकाशब्दस्यार्थ बोद्धुं शक्नुवन्ति ।
- देशाचारस्य प्रामाण्यं प्रतिपादयिष्यन्ति ।
- आचारस्य धर्मे प्रामाण्यं प्रतिपादयितुम् अर्हन्ति ।
- आकृत्या शब्दार्थबोधं प्रदर्शयितुमर्हन्ति ।

## VII.3 विरोधाधिकरणम् (1-3-2)

औदुम्बरी वेष्टितव्या सर्वेत्येषा स्मृतिर्मितिः ।
अमितिर्वेति सन्देहे मितिः स्यादष्टकादिवत् ।।
औदुम्बरीं स्पृशन् गायेदिति प्रत्यक्षवेदतः ।
विरोधान्मूलवेदस्याऽननुमानादमानता ।।इति।।

धर्मे श्रुतिः मुख्यभूतं प्रमाणं स्मृतिश्च तदनुमापकतयेति धर्मशास्त्रकारैः प्रतिपादितम् । परन्तु श्रुतिस्मृतिप्रमाणयोर्मध्ये परस्परं विरोधे श्रुतेः प्राबल्यं स्मृतेश्च दौर्बल्यं स्वीक्रियते । तस्मात् श्रुत्युक्तं गृह्यते स्मृत्युक्तं परित्यज्यते इति भावः । तत्र स्मृतिर्नाम धर्मशास्त्रम् । श्रुतिशब्देन वेद एव बोध्यते । यत्र श्रुतिवचनस्मृतिवचनयोर्मध्ये परस्परं विरोधो दृश्यते तत्र विरोधाधिकरणन्यायः आगच्छति । माधवाचार्य्येणात्र

तस्याधिकरणस्य संग्राहकाविमौ श्लोकौ समुपस्थापितौ, यौ तद्रचितजैमिनीयन्यायमालाविस्तरस्य प्रथमा- ध्याये तृतीयपादे द्वितीयाधिकरणे विद्येते ।

स्मृतेरपेक्षया श्रुतेः प्राबल्यप्रदर्शनमत्र **विषयः**। तस्य विषयस्य प्रतिपादनार्थं माधवाचार्योऽ-त्राभिप्रैति यत्सोमयागस्योत्तरवेद्यां विद्यमानस्य सदोनामकस्य मण्डपस्य मध्ये काचिदुदुम्बरशाखा स्तम्भत्वेन निखाता भवति । तां शाखामुद्दिश्य "औदुम्बरी सर्वा वेष्टितव्येति " स्मृतिवचनेन सर्ववेष्टनं स्मर्यते। तत्र **संशयो** भवति यत् एषा स्मृतिः प्रमाणं न वेति । ततः पूर्वाधिकरणे अष्टका कर्त्तव्येति स्मृतिवचनस्य वेदानुमापकत्वेन प्रामाण्यं प्रतिपादितम् । अतः तेन न्यायेन सर्ववेष्टनस्मृतिरपि प्रमाणं भवत्विति **पूर्वपक्षः** । किन्तु "औदुम्बरीं स्पृशन् गायेदिति " प्रत्यक्षवेदप्रमाणात् तस्याः औदुम्बर्य्याः शाखायाः स्पर्शो विधीयते । सर्ववेष्टने च सति नैतच्चोपपद्यते । अतः सर्ववेष्टनरूपवेदानुमापकस्मृतिप्रमाणापेक्षया प्रत्यक्षवेदस्य विरोधात् निर्मूला सर्ववेष्टन-स्मृतिरप्रमाणमिति **सिद्धान्तः** । एतेन श्रुतिस्मृत्योर्विरोधे सति स्मृत्यपेक्षया श्रुतेः प्राबल्यं निरूपितम् । इदमेव विरोधाधिकरणस्य तात्पर्य्यम् ।

### बोधप्रश्नाः

1.श्रुतिस्मृत्योर्मध्ये कस्याः प्राबल्यम् ?

-----------------

2.स्मृतिशब्दस्य कोऽर्थः ?

------------------

3.सर्ववेष्टनस्मृतिः प्रमाणं न वा ?

------------------

## VII.4 आचारप्रामाण्याधिकरणम् ( 1- 3- 4 )

सदाचारोऽप्रमा मा वा निर्मूलत्वादमानता ।
अष्टकादेरिवैतस्य समूलत्वात् प्रमाणता ।।इति।।

एकश्लोकात्मकमधिकरणमिदं जैमिनीयन्यायमालाविस्तरस्य प्रथमाध्याये तृतीयपादे चतुर्थाधिकरणे विद्यते। तस्मिन्नधिकरणे सदाचारस्य धर्मे प्रामाण्यं विचारितम् । धर्मशास्त्रे श्रुतेरनन्तरं स्मृतेः प्रामाण्यं यथा प्रतिपादितं तथा स्मृतेरनन्तरमाचारस्यैव प्रामाण्यं प्रतिपादितम् । स चाऽऽचारः सदाचार एव । सतामाचारः सदाचारः । स च शिष्टाचारशब्देनाऽपि सर्वत्र व्यपदिश्यते । तस्यैव सदाचारस्य धर्मे प्रामाण्य-पातिपादनं **विषयः** । तत्रादौ सदाचारस्य प्रामाण्यमस्ति न वेति **संशयः** । प्रसङ्गेऽस्मिन् **पूर्वपक्षो** वदति यत् – होलाकादिसदाचारस्य वेदमूलकत्वाभावात् प्रामाण्यं नास्तीति । परन्तु तन्न समीचीनम् । यतो हि वैदिकैः शिष्टैः परिगृहीतत्वेनाऽष्टका कर्त्तव्या इत्यादि स्मृतिप्रमाणवत् सदाचारस्यापि वेदमूलकत्वं विद्यते ।अतो मन्वा-

दिभिः विशेषाकारेण सदाचारस्यानुपदिष्टत्वेनापि सामान्याकारेणोपदिष्टम् । तस्मात् श्रुति–स्मृति–सदाचाराणां धर्मे प्रमाणत्वेनोपन्यासात् सदाचारस्य प्रामाण्यं विद्यत इति **सिद्धान्तः** । एतेन श्रुतिस्मृत्योरभावे परम्परया सदाचारस्य धर्मे प्रामाण्यं प्रतिपादितम् ।

### बोधप्रश्नाः

1. आचारस्य धर्मे प्रामाण्यमस्ति न वा ?
-----------------
2. सदाचार–शिष्टाचारयोः को भेदः ?
------------------
3. सदाचारस्य वेदमूलकत्वमस्ति न वा ?
------------------

## VII.5 होलाकाधिकरणम् (1-3-8)

होलाकादेर्व्यवस्था स्यात् साधारण्यमुताग्रिमः ।
देशभेदेन दृष्टत्वात् साम्यं मूलसमत्वतः ।।इति ।।

एकश्लोकात्मकमधिकरणमिदं जैमिनीयन्यायमालाविस्तरस्य प्रथमाध्याये तृतीयपादे अष्टमाधिकरणे विद्यते । अत्र होलाकाया देशविशेषे शिष्टैरनुष्ठेयमानत्वं प्रतिपादितम् । होलाका नाम वसन्तोत्सवः।“ प्राच्यैरेव होलाका कर्त्तव्या ” इति वचनानुसारेण पूर्वदेशीयाऽऽचाररूपेण तत्रत्यैः शिष्टैः होलाकाऽनुष्ठीयते । अत्र होलाकानुष्ठानस्य कर्त्तव्यत्वेन विधानं **विषयः**। तत्र देशभेदेनापि होलाकानुष्ठानस्य दृष्टत्वात् तत् सर्वैः सामान्येनाऽनुष्ठेयमथ वा केवलं पूर्वदेशीयैरिति **संशयो** भवति ।प्रसङ्गेऽस्मिन् पूर्वपक्षो वदति यत् –यथा दाक्षिणात्यैरह्निनैबुकं व्रतं क्रियते ,यथा च उद्वृषभयज्ञ उदीच्यैः क्रियते तथा होलाकानुष्ठानं प्राच्यैः क्रियते । अतोऽयं प्राच्यानां देशाचारविशेषः । तत्राह्निनैबुकव्रतं नाम स्वस्वकुलागतकरञ्जार्कादि– स्थावरदेवतानां पूजनम् । उद्वृषभयज्ञो नाम ज्येष्ठमासस्य पौर्णमास्यां बलीवर्द्दानामभ्यर्च्चनपूर्वकं जनैर्धावनम् । एतादृशमव्यवस्थितं भवति होलाकानुष्ठानमिति हेतोः तदप्रमाणमिति **पूर्वपक्षः**। परन्तु आचाराद्य स्मृतिं ज्ञात्वा स्मृतेश्च श्रुतिकल्पनमिति वचनात् होलाकानुष्ठानरुपाचारस्य वेदकल्पितत्वात् वेदस्य च सर्वसाधारणत्वेन तस्याचारस्यापि सर्वसाधारणत्वं वेदितव्यम् । अतः होलाकानुष्ठानरूप आचारः सर्वसाधारण इति **सिद्धान्तः** ।

प्रसङ्गेऽस्मिन् माधवाचार्य्येण गुरुमतमपि प्रदर्शितम् ।तद्यथा–

प्राच्यादिपदयुक्तयायाः श्रुतेरनुमिते पदे ।
अर्थाबोधादमात्वं चेन्न सामान्यानुमानतः ।।इति ।।

अत्र गुरुमतस्यायमभिप्रायो यत् प्राच्यादिव्यवस्थया होलाकादिष्वनुष्ठीयमानेषु तन्मूलस्मृति–

रपि प्राच्यादिपदयुक्तैवानुमातव्या । किन्तु तत्र प्राच्यादिपदस्यार्थो नावबुध्यते ।यतो हि ये पुरुषाः कश्चित्कालं यावत् प्राच्यां निवसन्ति ते कालान्तरे प्रतीच्यामपि निवसन्तो दृश्यन्ते । तत्र श्रौतप्राच्यादि पदस्यार्थाबोधा-दप्रमाणम् इति **पूर्वपक्षः** । अनुष्ठानसामान्यस्य मूलश्रुतिकल्पकत्वात् प्राच्यादिपदराहित्ये सति अर्थबोधा-दनुमिता श्रुतिः प्रमाणमिति **सिद्धान्तः** ।

## बोधप्रश्नाः

1.होलाकाशब्दस्य कोऽर्थः ?

-----------------

2.होलाकोत्सवः कस्य देशस्याचारः?

------------------

3 उद्वृषभयज्ञस्य किं स्वरूपम् ?

------------------

4.किं नामाऽह्निनैबुकं व्रतम्?

------------------

5 होलाका सर्वसाधारणीयाचारः पूर्वदेशीयाचारो वा ?

------------------

6 होलाकाधिकरणे गुरुमतं प्रदर्शयत ?

## VII.6 आकृत्यधिकरणम् (1-3-10)

व्यक्तिर्व्रीह्यादिशब्दार्थ आकृतिर्वा क्रियान्वयात् ।
व्यक्तिर्व्युत्पत्तिवेलायामाकृत्या सोपलक्ष्यते ।।
शक्तिग्रहादियुक्तिभ्य आकृतेरर्थतोचिता ।
क्रियापर्यवसानाय व्यक्तिस्तत्रोपलक्ष्यताम् ।।

श्लोकद्वयात्मकमधिकरणमिदं जैमिनीयन्यायमालाविस्तरस्य प्रथमाध्याये तृतीयपादे दशमाधिकरणे विद्यते । अत्र द्रव्याणामाकृत्यैव सङ्केतग्रहणं कृत्वाऽर्थबोधः कार्य इति **विषयः** । आकृतिर्नाम जातिः । जात्या सङ्केतग्रहः सर्वैः स्वीक्रियते । अत्र **संशयो** यत् ब्रीहीनवहन्ति , पशुमालभते , गामानय, ब्राह्मणो न हन्तव्य इत्यादिप्रयोगेषु ब्रीह्यादिशब्दानामर्थाः ब्रीह्यादिव्यक्त्या बोध्यन्ते आकृत्या वेति । प्रसङ्गेऽ-स्मिन् **पूर्वपक्षो** वदति यत् - ब्रीहीनवहन्तीत्यादिप्रयोगेषु ब्रीह्यादिशब्दानां व्यक्तिरेवार्थः इति । यतो हि अव-हननादिक्रियया सह व्यक्तेरन्वयः सम्भवति नाकृतेः । अतो व्यक्त्या अर्थग्रहो युक्तः,व्युत्पत्तिकाले व्यक्त्या चाकृतिरुपलक्ष्यत इति । परन्तु नैतत् समीचीनम् । यतो हि व्यक्तीनामसंख्यत्वेनानन्त्याच्छुक्लव्यक्तौ गृहीतो ऽर्थः कृष्णव्यक्तावपि व्यभिचरतीति हेतोः व्यभिचारदोषाद्याऽन्वयव्यतिरेकाभ्यामाकृतेः शक्तिग्रहणनिमित्तत्वात्

शब्दार्थता तस्या एवोचिता । न तु व्यक्तौ व्युत्पत्तिः सम्भवति । यद्यपि ब्रीहीनवहन्ति इत्यादिप्रयोगकाले आकृतौ अवहननादिक्रिया न पर्यवस्यति , तथापि तत्राऽऽकृत्या व्यक्तिमुपलक्ष्य अर्थबोधः कार्यः । अत आकृत्याऽर्थबोधः करणीय एव , तया चाकृत्या व्यक्तिरुपलक्ष्यतामिति सिद्धान्तः । एतावताऽऽकृत्यधिकरणं माधवाचार्य्येण प्रतिपादितम् ।

### बोधप्रश्नाः

1. आकृतिशब्दस्य कोऽर्थः ?

   -----------------
2. आकृत्या व्यक्तिराक्षिप्यते व्यक्त्याऽऽकृतिर्वा ?

   ------------------
3. आकृत्यधिकरणे कः पूर्वपक्षः ?

   ------------------
4. ब्रीह्यादिव्यक्तौ अर्थग्रहणे को दोषः ?

   ------------------
5. अन्वय-व्यतिरेकशब्दयोः किं तात्पर्य्यम् ?

   ------------------

## VII.7 सारांशः

अस्मिन् खण्डे चत्वारि अधिकरणानि प्रतिपादितानि । तानि विरोधाधिकरणम् ,आचारप्रामाण्यधिकरणम् , होलाकाधिकरणम्,आकृत्यधिकरणश्चेति । तत्र प्रत्यधिकरणं विषय-संशय-पूर्वपक्ष-सिद्धान्तश्च पृथक् पृथक् स्पष्टतया माधवाचार्योक्तदिशा प्रतिपादिताः। एतेषु चतुर्षु अधिकरणेषु होलाकाधिकरणे आकृत्यधिकरणे च तेन भाट्टमतेन सह गुरुमतमप्युपन्यस्तम् । तत्र विरोधाधिकरणे स्मृतेरपेक्षया श्रुतेः प्राबल्यं प्रदर्शितम् । आचारप्रामाण्याधिकरणे देशाचारस्य प्रामाण्यं प्रतिपादितम् । होलाकाधिकरणे होलाकायाः पूर्वदेशीयाचारत्वने प्रतिपादनं कृतम् । आकृत्यधिकरणे च अकृत्येव सङ्केतग्रहः कार्यः , न व्यक्त्या ; यतो हि आकृत्या स्वत एव व्यक्तिराक्षिप्यते ।

## VII.8 पारिभाषिकशब्दाः

अग्रीमः - प्राच्यः

अन्वयः - यत् सत्त्वे तत् सत्ता

अष्टका - हेमन्तशिशिरऋत्वोः कृष्णपक्षाष्टमीषु क्रियमाणानि

पितृश्राद्धानि

| | |
|---|---|
| अह्निनैबुकव्रतम् - | स्वस्वकुलागतकरञ्जार्कादिस्थावरदेवतानां पूजनम् । |
| आकृतिः – | जातिः |
| आचारः– | देशाचारः , शिष्टाचारः |
| उदुम्बरी – | उदुम्बरवृक्षस्य शाखा |
| उद्वृषभयज्ञः - | ज्येष्ठमासस्य पौर्णमास्यां बलीवर्दानामभ्यर्चनपूर्वकं जनैर्धावनम् । |
| व्यभिचारः – | यदभावे तदभावः |
| शक्तिग्रहः – | सङ्केतग्रहणम् |
| सदाचारः– | शिष्टाचारः |
| स्मृतिः– | धर्मशास्त्रम् |
| होलाका – | वसन्तोत्सवः |

## VII.9 आदर्शप्रश्नाः

### निबन्धात्मकप्रश्नाः (प्रत्येकं 20/15 अङ्काः )

१) विरोधाधिकरणस्य स्वरूपं प्रदर्श्य श्रुतेः प्राबल्यं प्रदर्शयत ।
२) होलाकाधिकरणस्य तात्पर्यं प्रतिपाद्य आचारस्य प्रामाण्यं प्रतिपादयत ।
३) आचारस्य धर्मे प्रामाण्यमस्ति न वेति माधवोक्तदिशा प्रतिपादयत ।
४) आकृत्या व्यक्तिराक्षिप्यते व्यक्त्याऽऽकृतिर्वेति यथाग्रन्थं प्रतिपादयत।

### विश्लेषणात्मकप्रश्नाः (प्रत्येकं 12/10 अङ्काः )

१) विरोधाधिकरणस्य वैशिष्ट्यं प्रतिपादयत ।
२) सदाचारस्य प्रामाण्यं आचारप्रामायाधिकरणन्यायात् प्रतिपादयत ।
३) होलाकाधिकरणस्य तात्पर्यं प्रदर्शयत ।
४) आकृत्यधिकरणस्य पूर्वपक्षं सयुक्तिकमुपस्थापयत ।

### लघुप्रश्नाः (प्रत्येकं 5 अङ्काः )

१) सदाचारस्य प्रामाण्यं प्रदर्शयत ।
२) आकृत्यधिकरणस्य तात्पर्यं प्रतिपादयत ?

३) का नाम होलाका ?
४) सर्ववेष्टनीस्मृतिः कथमप्रमाणम्   ?
५) का नाम अष्टका ?
६) उद्वृषभयज्ञस्य स्वरूपं प्रतिपादयत ।

### एकाङ्कप्रश्नाः (प्रत्येकं 1 अङ्कः)

१) स्मृतिशब्दस्य कोऽर्थः ?
२) सर्ववेष्टनस्मृतिः प्रमाणं न वा ?
३) श्रुतिस्मृत्योर्मध्ये कस्याः प्राबल्यम् ?
४) होलाकाशब्दस्य कोऽर्थः ?
५) होलाकोत्सवः कस्य देशस्याचारः ?
६) उद्वृषभयज्ञः कदाऽनुष्ठीयते ?
७) अह्निनैबुकव्रते का देवताः पूज्यन्ते ?
८) होलाका सर्वसाधारणीयाचारः पूर्वदेशीयाचारो वा ?
९) आचारस्य धर्मे प्रामाण्यमस्ति न वा ?
१०) आकृतिशब्दस्य कोऽर्थः
११) आकृत्याऽर्थबोधः क्रियते व्यक्त्या वा ?
१२) अष्टका कदानुष्ठीयते ?

## VII-10 एकाङ्कप्रश्नानामुत्तराणि

१) धर्मशास्त्रम्
२) न प्रमाणम्
३) श्रुतेः
४) वसन्तोत्सवः
५) पूर्वदेशस्य
६) ज्येष्ठपौर्णमास्याम्
७) स्थावरदेवताः
८) पूर्वदेशीयाचारः
९) अस्ति
१०)जातिः
११) आकृत्या
१२)हेमन्तशिशिरयोः ऋत्वोः

**********

# UNIT-VIII (अष्टमखण्डः) उद्भिदधिकरणम् , चित्राधिकरणम् अग्निहोत्राधिकरणम् , वाजपेयाधिकरणम् ,

## VIII.1 **प्रस्तावना**

जैमिनीयन्यायमालाविस्तरस्य चत्वार्य्येवाधिकरणानि अत्र विचार्यन्ते । उद्भिदधिकरणम् , चित्राधिकरणम् , अग्निहात्राधिकरणम् वाजपेयाधिकरणश्च । अत्रापि प्रत्यधिकरणं विषय- संशय-पूर्वपक्ष-सिद्धान्त इति चतुर्भिः क्रमवृत्तिभिः विचारो माधवाचार्येणोपस्थापितः । तत्र उद्भिदधिकरणे उद्भिदा यजेतेत्यत्र उद्भिच्छब्दस्य गुणत्वं निरस्य नामत्वं प्रतिपादितम्। तदनन्तरं चित्राधिकरणे चित्रया यजेत पशुकाम इत्यत्र चित्राशब्दस्य गुणत्वस्वीकारे एकं पशुमुद्दिश्य चित्रत्व-स्त्रीत्वयोर्द्वयोर्विधाने वाक्यभेदभयात् चित्रा- शब्दस्य कर्मनामधेयत्वं माधवाचार्येण प्रतिपादितम् । ततः अग्निहोत्राधिकरणे अग्निहोत्रं जुहोतीत्यत्र अग्निहोत्र- शब्दस्य गुणत्वं निरस्य तत्प्रख्यशास्त्रात् तस्य कर्मनामधेयत्वं प्रतिपादितम् । तदनन्तरं वाजपेयाधिकरणे वाजपेयशब्दस्यार्थं प्रतिपाद्य तस्य गुणत्वं खण्डयित्वा कर्मनामधेयत्वं माधवाचार्य्येण प्रतिपादितम् ।

## VIII.2 **उद्देश्यम्**

प्रियपाठकाः ! अस्मिन् खण्डे भवन्तः अधोलिखितान् विन्दून् आलोचयिष्यन्ति ।

- उद्भिच्छब्दस्यार्थं प्रदर्शयितुमर्हन्ति ।
- उद्भिच्छब्दस्य यागनामत्वं निरूपयिष्यन्ति ।
- चित्राशब्दस्य यागनामत्वं प्रतिपादयिष्यन्ति ।
- अग्निहोत्रशब्दस्यार्थं व्युत्पादयितुम् अर्हन्ति ।
- वाजपेयशब्दस्यार्थ प्रदर्शयितुमर्हन्ति ।
- वाक्यभेदभयात् चित्राशब्दस्य गुणत्वं निरस्य नामत्वं प्रतिपादयिष्यन्ति ।

## VIII.3 **उद्भिदधिकरणम्** (1-4-2)

**गुणोऽयं नामधेयं वा खनित्रेऽस्य निरुक्तितः ।**

ज्योतिष्टोमं समाश्रित्य  पश्वर्थ गुणचोदना ।।
फलोद्भेदात्समानैषा  निरुक्तिर्यागनाम्न्यपि ।
नामत्वमुचितं      यागसामानाधिकरण्यतः ।। इति ।।

श्लोकद्वयात्मकमधिकरणमिदं जैमिनीयन्यायमालाविस्तरस्य प्रथमाध्याये चतुर्थपादे द्वितीयाधिकरणे विद्यते । विधिमन्त्रार्थवादनामधेयनिषेधानां पञ्चानामेव वेदत्वं स्वीक्रियते । धर्मे वेदः प्रमाण-मित्युक्ते विध्यादीनां पञ्चानां धर्मे प्रामाण्यमस्तीति ज्ञायते । "उद्भिदा यजेत पशुकाम " इत्यत्र उद्भिद्यागस्य पशुफलकत्वविचारो **विषयः** । तत्र **संशयो** यत् उद्भिद् पदं गुणः नामधेयं वेति । प्रसङ्गेऽस्मिन् **पूर्वपक्षो** वदति यत् ज्योतिष्टोमयागमुद्दिश्य पशुफलकामिना उद्भिदेत्यत्र तृतीयान्तेन पदेन उद्भिद्यते भूमिरनेनेति व्युत्पत्त्या खनित्रेण यागः कर्त्तव्य इति बोधनात् "दध्ना जुहोतीति" वदत्र गुणविधिः स्वीकरणीयः। परन्तु नैतत् समीचीनम् । यतो हि पशुरूपफलाय खनित्रेण यागः कर्त्तव्य इत्युक्ते दध्यादिद्रव्यवत् खनित्राख्यस्य द्रव्यस्य यागे प्रसिद्ध्यभावात् तस्य यागङ्गात्वेनान्वयो न सम्भवति । तस्मात् केन यागेन पशुरूपं फलं भावयेदित्याकाङ्क्षायां उद्भिदेत्यत्र तृतीयान्तं पदं यागनामत्वेनान्वेति । तत्रापि उद्भिच्छब्दस्य उद्भिद्यते अर्थात् उत्पद्यते फलमनेनेति समानैव व्युत्पत्तिः । एतेन गुणत्वे नामत्वे च शब्दनिर्वचनसाम्यात् न कोऽपि निर्णय इति चेदुच्यते सामानाधिकरण्याादत्र निर्णय इति । अतः उद्भिन्नामकेन यागेन पशुं भावयेदिति । यदि नामस्वीकारं न कृत्वा गुणोऽत्र स्वीक्रियेत , तर्हि उद्भिद्वता अर्थात् खनित्रवता यागेन पशुं भावयेदिति सामानाधिकरण्यात् बोध्यते । तथा सति मतुबर्थे लक्षणा स्वीकरणीया । अभिधेयार्थबोधे सति लक्षणाश्रयणमनुचितम् । पुनश्च उद्भिच्छब्दस्य लोकप्रसिद्धार्थाभावादनया रीत्या नामधेयत्वं युक्तम् । अतो मत्वर्थलक्षणाभयात्  उद्भिद्पदस्य  यागनामधेयत्वमिति  **सिद्धान्तः** ।

## बोधप्रश्नाः

1. उद्भिच्छब्दस्य कोऽर्थः ?
   -----------------
2. का नाम मत्वर्थलक्षणा ?
   -----------------
3. उद्भिच्छब्दस्य गुणत्वं नामधेयत्वं वा ?
   -----------------
4. किं कामायमानः उद्भिदा यजेत ?
   -----------------
5. उद्भियागस्य फलं किम् ?
   -----------------
6. उद्भिच्छब्दस्य गुणत्वे का व्युत्पत्तिः ?
   -----------------
7. उद्भिच्छब्दस्य नामत्वे का व्युत्पत्तिः ?
   -----------------

## VIII.4 **चित्राधिकरणम्** (1-4-3)

यच्चित्रया यजेतेति तद्गुणो नाम वा भवेत् ।
चित्रस्त्रीत्वगुणो रूढेरग्नीषोमीयके पशौ ।।
द्वयोर्विधौ वाक्यभेदो वैशिष्ट्ये गौरवं ततः ।
स्यान्नाम पृष्ठाज्यवहिष्पवमानेषु तत् तथा ।।

श्लोकद्वयात्मकमधिकरणमिदं जैमिनीयन्यायमालाविस्तरस्य प्रथमाध्याये चतुर्थपादे तृतीयाधिकरणे विद्यते । " चित्रया यजेत पशुकाम " इत्यत्र पशुफलाय चित्रानामको यागोऽनुष्ठेय इति **विषयः** । तत्र **संशयो** यत् चित्रयेत्यत्र तृतीयाविभक्तेः निर्दिष्टत्वात् गुणत्वं नामधेयत्वं वेति ।प्रसङ्गेऽस्मिन् **पूर्वपक्षो** वदति यत् –"अग्नीषोमीयं पशुमालभेत " इति विहितं पशुयागमुद्दिश्य यजतेत्यनेन पदेनानूद्य तस्मिन् पशौ चित्रत्वस्त्रीत्वगुणौ विधीयेते इति ; नत्वत्र उद्भिच्छब्दवत् चित्राशब्दो यौगिकः । परन्तु नैतत् समीचीनम् ।यतो हि एकं पशुमुद्दिश्य चित्रत्व–स्त्रीत्वगुणविधौ (यः पशुरुद्दिष्टः स एव स्त्रीपशुः चित्रविचित्रश्चेति )। तथा सति एकमुद्दिश्य द्वयोर्विधाने वाक्यभेददोषः प्रसज्यते । तद्दोषपरिहाराय गुणद्वयविशिष्ट–पशुद्रव्यकारकविधाने च गौरवापत्तिः ।अतः चित्राशब्दः कर्मनामधेयम् ।वस्तुतः प्राजापत्ययागस्य नामान्तरं भवति चित्रायागः । पशु– फलाय प्राजापत्ययागो विहितः । तस्मिन् यागे "दधिमधुघृतमापोधानास्तण्डुलाः तत्संसृष्टं प्राजापत्यम् "इति वचनात् तत्र दधिमध्वादिचित्रविचित्रद्रव्याणां प्रदानात् यागस्य चित्रेति नाम प्रदत्तम् ।प्राजापत्येन यजेतेति उत्पत्तिवाक्यस्य चित्रया यजेत पशुकाम इति फलवाक्यम् । अतः चित्रा यागस्य नामेति न तत्पदस्य गुणत्वेन विधानं युक्तम् । यथा बहिष्पवमानाज्यपृष्ठादिशब्दाः सामगानस्य स्तोत्रविशेषाणां नामधेयानि भवन्ति तथा चित्राशब्दः कर्मनामधेयम् इति **सिद्धान्तः** ।

### बोधप्रश्नाः

1. चित्रा कस्य यागस्य नाम ?
   -----------------
2. चित्रायागे कानि द्रव्याणि ?
   ------------------
3. किमर्थं चित्रया यजेत ?
   ------------------
4. चित्राशब्दस्य गुणत्वस्वीकारे का हानिः ?
   ------------------
5. बहिष्पवमानाज्यपृष्ठादिशब्दैः केषां नामानि बोध्यन्ते ?
   ------------------
6. कुत्र वाक्यभेददोषः प्रसज्यते ?
   ------------------

## VIII.5 अग्निहोत्राधिकरणम् (1-4-4)

अग्निहोत्रं जुहोत्याघारमाघारयतीत्यमू ।
विधेयौ गुणसंस्कारावाहोस्वित् कर्मनामनी ।।
अग्नये होत्रमत्रेति बहुव्रीहिगतोऽनलः।
गुणो विधेयो नामत्वे रूपं न स्यात् क्षरद्धृते ।।
संस्क्रियाघारमाघारयतीत्युक्ता द्वितीयया ।
आघारेत्यग्निहोत्रेति यौगिके कर्मनामनी ।।
अग्निर्ज्योतिरिति प्रोक्तो मन्त्राद्देवस्तथा घृतम् ।
चतुर्गृहीतवाक्योक्तं द्वितीयायास्त्वियं गतिः ।।
नासाधिते हि धात्वर्थे करणत्वं ततोऽस्य सा ।
साध्यतां वक्ति संस्कारो नैवाशङ्क्यःक्रिया त्वतः ।।

पञ्चश्लोकात्मकमधिकरणमिदं जैमिनीयन्यायमालाविस्तरस्य प्रथमाध्याये चतुर्थपादे चतुर्था-धिकरणे विद्यते । अत्राग्निहोत्रं जुहोति,आघारमाघारयतीत्यादौ अग्निहोत्रादिशब्दानां कर्मनामत्वप्रतिपादनं **विषयः**। तत्राग्निहोत्राऽऽघारशब्दौ गुणसंस्करौ कर्मनामनी वेति **संशयः** । प्रसङ्गेऽस्मिन् पूर्वपक्षः प्रतिपादयति यत् – अग्निहोत्रशब्दे द्रव्यदेवतयोर्निर्देशाभावात् यागस्य स्वरूपमेव न सिद्ध्यति ।ततो न तस्य कर्मनामत्वम् । पुनश्च आघारमाघारयतीत्यत्र "घृ"क्षरणे इत्यस्माद्धातोः आघारशब्दस्योत्पत्तेः तस्य संस्कार्यत्वमेव प्रतीयते न तु कर्मनामत्वम् । अतोऽग्निहोत्राघारशब्दौ गुणसंस्कारयोर्विधायकौ इति ।

परन्तु नैतत् समीचीनम् । यतो हि अग्निर्ज्योतिर्ज्योतिरग्निः स्वाहेति सायं जुहोति , सूर्य्यो ज्योतिर्ज्योतिः सूर्य्यः स्वाहेति प्रातर्जुहोतीति विहितेन मन्त्रेणाग्नेर्देवतात्वं पूर्वं प्राप्तम् ।अतो देवताया गुणत्वेन विधानं न सम्भवति । ततोऽग्निसूर्यदेवताकस्य सायंप्रातः कालयोर्नियमेनानुष्ठेयस्य कर्मणः अग्नये होत्रमिति व्युत्पत्त्या यौगिकं कर्मनामधेयम् । आघारमाघारयत्यत्रापि आज्यद्रव्यस्य प्राप्ततया क्षरद्धृतसंस्कारस्याऽ- विधेयत्वात् आघारशब्दोऽपि यौगिकं कर्मामधेयम् । यस्मिन् कर्मणि नैऋतिं दिशमारभ्य आग्नेयीं दिशं यावत् सन्तत्या घृतं क्ष्यार्यते , तस्य कर्मण एवैतन्नाम । नत्वत्र अत्राग्निहोत्रं जुहोति,आघारमाघारयतीत्यादौ अग्निहोत्रादिशब्दानां द्वितीयाविभक्त्या प्रयुक्तत्वात् ब्रीहीन् प्रोक्षतीति वत् संस्कारः शङ्कनीयः । तस्मादग्नि- होत्राघारशब्दौ न दर्वीहोमोपांशुयागयोर्गुणसंस्कारविधायकौ ; अपि तु कर्मान्तरयोर्नामधेयाविति **सिद्धान्तः** ।

### बोधप्रश्नाः

1. अग्निहोत्रं जुहोतीत्यत्र अग्नेर्देवतात्वं विहितमुत अग्निहोत्रं कर्मणो नाम ?

   -----------------

2. अग्नेर्देवतात्वं केन मन्त्रेण प्राप्तम् ?

   ------------------

VIII.6 वाजपेयाधिकरणम् (1-4-6)

यजेत वाजपेयेन स्वाराज्यार्थीत्यसौ गुणः।
नाम वा गुणता तन्त्रयोगाद् गुणफलद्वये ।।
साधारणयजेः कर्मकरणत्वे न तन्त्रता ।
त्रिकद्वयं विरुद्धं स्यात् तन्त्रतायां फलं प्रति।।
उपादेयविधेयत्वगुणवाक्यं त्रिकं यजेः ।
उद्देश्यानूक्तिमुख्यत्वत्रिकं तस्य गुणं प्रति ।।
त्यक्त्वा तन्त्रं तदावृत्तौ वाक्यं भिद्यते तेन सः।
वाजपेयेति शब्दोऽपि कर्मनामाग्निहोत्रवत् ।।

श्लोकचतुष्टयात्मकमधिकरणमिदं जैमिनीयन्यायमालाविस्तरस्य प्रथमाध्याये चतुर्थपादे षष्ठा- धिकरणे विद्यते । अत्र वाजपेयेन स्वाराज्यकामो यजेतेत्यत्र वाजपेयशब्दस्य कर्मनामत्वप्रतिपादनं **विषयः** । तत्र संशयो यत् वाजपेयशब्दो गुणवाचको नामवाचको वेति ।

तत्र **पूर्वपक्षः** प्रतिपादयति यत् - वाजब्दस्यान्नवाचित्वात् ,तस्यैवान्नस्य पेयसुराद्रव्यत्वाच्च तस्य गुणत्वेन स्वीकारोऽस्त्विति । पुनश्च तत्र शङ्का क्रियते यत् गुणत्वस्वीकरे वाजपेयगुणवता यागेन स्वाराज्यं भावयेदित्यत्र उद्भिदा यजेतेतिवत् मत्वर्थलक्षणा प्रसज्येत । किन्तु तन्न । यतो हि सकृदुच्चारितस्य यजेतेति आख्यातस्य वाजपेये गुणे स्वाराज्ये फले च तन्त्रेण सम्बन्धस्वीकारात् वाजपेयेन द्रव्येण स्वाराज्यार्थी यजेतेत्युभयसम्बन्धो बोध्यते । तत्राप्युच्यते यत् वाजपेयगुणेन यागं कुर्य्यादित्यत्र यजेः कर्मकारकत्वे फल- सम्बन्धे च यागेन स्वाराज्यकामो यजेतेत्यत्र यजेः करणकारकत्वे च सति कथमुभयसम्बन्ध इति वीक्षायां यजेः साधारणत्वेन प्रकृत्या यागरूपत्वस्य प्रत्ययेन च भावनारूपत्वस्य च कथनात् तयोः समभिव्याहारात् सम्बन्धमात्रगम्यत्वेन न द्विरूपत्वसम्भवः । अतः साधारणस्य यजेरुभाभ्यां युगपत् तन्त्रेण सम्बन्धे सति वाजपेयद्रव्येण यागं कुर्यादित्यर्थस्वीकारे न मत्वर्थलक्षणाप्रसङ्ग इति । अतोऽत्र वाजपेयशब्दस्य गुणत्वेन विधानमिति पूर्वपक्षः।

परन्तु नैतत्समीचीनम् । यतो हि यजतेः तन्त्रेणोभयसम्बन्धे सति विरुद्धत्रिकद्वयापत्तिः स्यात् । स्वाराज्यफलोद्देश्येन यागस्य विधाने यागस्य विधेयत्वमुपादेयत्वं गुणत्वञ्चेति एकं त्रिकमुत्पद्यते ।पुनश्च यागोद्देश्येन वाजपेयद्रव्यस्य विधाने तस्यैव यागस्योद्देश्यत्वमनुवाद्यत्वं मुख्यत्वञ्चेत्यपरं त्रिकं सञ्जायते । अत्रोपादेयत्वादयः त्रयः साधनभूता यजिनिष्ठा धर्माः । उद्देश्यत्वादयः त्रयश्च स्वाराज्यफलनिष्ठा धर्माः। फल मुद्दिश्य याग उपादीयते फलमनूद्य यागो विधीयते । फलस्य प्राधानं , यागस्य चा चाप्राधान्यम् ।अतः फलयागयोःप्रधानोपसर्जनभावः। तस्मात् स्वाराज्यफलस्योद्देश्यत्वादित्रिकेन सह वाजपेयद्रव्यस्योपादेयत्वा- दित्रिकस्य युगपत् सम्बन्धे सति विरुद्धत्रिकद्वयापत्तिरापद्यते । पुनश्च तन्त्रणोभयसम्बन्धं न स्वीकृत्य यदि पृथक्

सम्बन्धः स्वीक्रियेत तर्हि वाक्यभेददोष आपद्येत । तस्मात् वाजपेयशब्दो न गुणविधायकः अपि तु अग्निहोत्रशब्दवत् कर्मनामधेयमिति सिद्धान्तः । एतेन वाजपेयाधिकरणं माधवाचार्येण समयक् प्रतिपादितम् ।

### बोधप्रश्नाः

1. वाजशब्दस्य कोऽर्थः ?

   -----------------

2. वाजपेययागे किं द्रव्यम् ?

   ------------------

3. वाजपेययागस्य किं फलम् ?

   ------------------

4. वाजपेयशब्दस्य गुणत्वस्वीकारे का हानिः ?

   ------------------

5. विरुद्धत्रिकं किम् ?

   ------------------

6. वाजपेयाधिकरणे पूर्वपक्षस्य कोऽभिप्रायः ?

   ------------------

## VIII.7 सारांशः

अस्मिन् खण्डे चत्वारि अधिकरणानि प्रतिपादितानि । तानि यथा- उद्भिदधि-करणम् ,चित्राधिकरणम् , अग्निहोत्राधिकरणम् वाजपेयाधिकरणञ्चेति । तत्रोद्भिदधिकरणे मत्वर्थलक्षणाभयात् उद्भिच्छब्दस्य यागनामत्वं स्वीकृतम् । चित्राधिकरणे च चित्राशब्दस्य गुणत्वस्वीकारे वाक्यभेददोषदर्शनात् तत्परिहाराय चित्राशब्दस्य यागनामत्वं प्रतिपादितम् ।अग्निहोत्राधिकरणेऽग्नेर्देवतात्वेन पूर्वं प्राप्तत्वात् तत्र देवतारूपगुणत्वविधानस्यायुक्तत्वाच्च अग्निहोत्रस्य कर्मनामधेयतवं प्रतिपादितम् । वाजपेययागे च वाजपेयस्य द्रव्यत्वेन गुणत्वेन विधाने स्वाराज्यस्य च यागफलत्वविधाने विरुद्धत्रिकद्वयापत्तेः सम्भवात्तत्र वाजपेययागस्य कर्मनामधेयत्वं माधवाचार्य्येण प्रतिपादितम् ।

## VIII.8 पारिभाषिकशब्दाः

| | |
|---|---|
| अग्निहोत्रम् – | सायं प्रातः क्रियमाणहोमः |
| आघारः – | होमविशेषः |
| आज्यम् – | सामगानसम्बन्धिस्त्रोत्रविशेषः |
| खनित्रम् – | भूमिखननार्थं व्यवहृतो लौहदण्डः |
| गुणः– | अङ्गम् |

| | |
|---|---|
| ज्योतिष्टोमः- | सोमयागाः |
| तन्त्रम् - | सहानुष्ठानम् |
| पृष्ठम् - | सामगानसम्बन्धिस्त्रोत्रविशेषः |
| प्राजापत्यः- | प्रजापतिदेवताक पशुद्रव्यको यागः |
| बहिष्पवमानम् - | सामगानसम्बन्धिस्त्रोत्रविशेषः |
| मत्वर्थलक्षणा - | मतुबर्थे लक्षणास्वीकारः |
| वाक्यभेदः - | एकमुद्दिश्य द्वयोर्विधाने सृष्टो दोषविशेषः |
| वाजः - | अन्नम् |
| वाजपेयम् - | यागविशेषः |
| विरुद्धत्रिकम् - | विधेयत्वोपादेयत्वगुणत्वत्रिकेण सह उद्देश्यत्वानुवाद्यत्व-मुख्यत्वत्रिकस्य विरोधः |
| संस्क्रिया - | संस्कारः |

## VIII.9 आदर्शप्रश्नाः

### निबन्धात्मकप्रश्नाः (प्रत्येकं 20/15 अङ्काः )

१) उद्भिदा यजेत पशुकाम इत्यत्र उद्भिच्छब्दस्य कर्मनामत्वं प्रतिपादयत ।
२) चित्राधिकरणे चित्राशब्स्य कर्मनामधेयत्वं प्रतिपादयत ।
३) अग्निहोत्राधिकरणेऽग्नेर्देवतात्वविधानं निरस्याग्निहोत्रस्य कर्मनामत्वं माधवोक्तदिशा प्रतिपादयत ।
४) वाजपेयाधिकरणे वाजपेयशब्स्य यागनामत्वं प्रतिपादयत।

### विश्लेषणात्मकप्रश्नाः (प्रत्येकं 12/10 अङ्काः )

१) उद्भिदाधिकरणस्य वैशिष्ट्यं प्रतिपादयत ।
२) चित्रया यजेतेत्यत्र वाक्यभददोषमुपस्थापयत ।
३) चित्रा यागस्य नामैवेति यथाग्रन्थं प्रतिपादयत ।
४) अग्निहोत्राधिकरणेऽग्निहोत्रस्य कर्मनामधेयत्वमुपस्थापयत ।
५) वाजपेययागस्य वैशिष्ट्यं प्रतिपादयत ।
६) वाजपेयेन यजेतेत्यत्र वाजपेयशब्दस्य कर्मनामत्वं प्रतिपादयत ।

### लघुप्रश्नाः (प्रत्येकं 5 अङ्काः )

१) उद्भिच्छब्दस्य व्युत्पत्तिं प्रदर्शयत ।

२) चित्रायागस्य स्वरूपं प्रतिपादयत ?
३) अग्निहोत्रशब्दस्यार्थं प्रकटयत ?
४) वाजपेययागे द्रव्यं फलञ्च प्रतिपादयत ?
५) चित्राधिकरणे वाक्यभेदं प्रदर्शयत ?
६) उद्भिदा यजेतेत्यत्र पूर्वपक्षस्याभिप्रायं प्रकटयत ।

### एकाङ्कप्रश्नाः (प्रत्येकं 1 अङ्कः)

१) उद्भिच्छब्दो यौगको लाक्षणिको वा ?
२) उद्भिच्छब्दस्य गुणत्वं नामधेयत्वं वा ?
३) किं कामायमानः उद्भिदा यजेत ?
४) उद्भिद्यागस्य फलं किम् ?
५) चित्रा कस्य यागस्य नाम ?
६) चित्रायागे कीदृशानि द्रव्याणि ?
७) किमर्थं चित्रया यजेत ?
८) चित्राशब्दस्य गुणत्वस्वीकारे को दोषः ?
९) कुत्र वाक्यभेददोषः प्रसज्यते ?
१०) बहिष्पवमानं नाम किम् ?
११) आज्यशब्देन किं बोध्यते ?
१२) पृष्ठशब्देन किं बोध्यते ?
१३) वाजशब्दस्य कोऽर्थः?
१४) किमर्थं वाजपेयेन यजेत ?
१५) अग्निहोत्रशब्दस्य गुणत्वं कर्मनामत्वं वा
१६) वाजपेययागे वाजपेयद्रव्यस्य गुणत्वस्वीकारे को दोषः ?

## VIII-10 एकाङ्कप्रश्नानामुत्तराणि

| | |
|---|---|
| १) यौगिकः | २) नामधेयत्वम् |
| ३) पशुम् | ४) पशुः |
| ५) प्राजापत्यः | ६) चित्रविचित्राणि |
| ७) पशुप्राप्तये | ८) वाक्यभेददोषः |
| ९) एकमुद्दिश्य द्वयोर्विधाने | १०) सामवेदीयस्तोत्रविशेषः |
| ११) सामवेदीयस्तोत्रविशेषः | १२) सामवेदीयस्तोत्रविशेषः |

१३) अन्नम्		१४) स्वाराज्यार्थम्

१५)कर्मनामत्वम्		१६)विरुद्धत्रिकद्वयापत्तिः

# UNIT-IX (नवमखण्डः) प्रोक्षण्यधिकरणम् , वैश्वदेवाधिकरणम् वैश्वानराधिकरणम्, ज्योतिरधिकरणम्

## IX.1 प्रस्तावना

जैमिनीयन्यायमालाविस्तरस्यात्रापि चत्वार्य्येवाधिकरणानि विचार्यन्ते । प्रोक्षण्य–धिकरणम् , वैश्वदेवाधिकरणम् , वैश्वानराधिकरणम् , ज्योतिरधिकरणञ्चेति । अत्रापि प्रत्यधिकरणं विषय–संशय–पूर्वपक्ष–सिद्धान्त इति चतुर्भिः क्रमवृत्तिभिः विचारो माधवाचार्येणोपस्थापितः । तत्र प्रोक्षण्यधिकरणे प्रोक्षणीशब्दस्य संस्कारवाचकत्वं जातिवाचकत्वं च निरस्य योगत्वं प्रतिपादितम्। तदनन्तरं वैश्वदेवाधिकरणे चातुर्मास्याद्यपर्वणि विहितेष्वष्टसु आग्नेयादियागेषु वैश्वदेवेन यजेतेत्यत्र प्रयुक्तस्य वैश्वदेवशब्दस्य देवतात्वेन गुणविधिं निरस्य आग्नेयाद्यष्टानां यागानां सङ्घस्य नामत्वं प्रतिपादितम् । ततो वैश्वानराधिकरणे वैश्वानरं द्वादशकपालं निर्वपेत् पुत्रे जाते इत्यत्र वैश्वानरयागसविधेऽष्टकपालादियागानां फलश्रुतेः तेषामष्टकपालादीनां यागानां नामत्वं निरस्य अष्टकपालादिभिरवयवैः द्वादशकपालस्यावयविनः स्तुतिर्भवतीति माधवाचार्येण प्रतिपादितम् । तदनन्तरं ज्योतिरधिकरणे अथैष ज्योतिरथैष विश्वज्योतिरथैष सर्वज्योतिरेतेन सहस्र– दक्षिणेन यजेतेत्यत्र ज्योतिरितिपदमनूद्य तस्मिन् सहस्रदानलक्षणगुणस्य निराकरणं कृत्वा अथशब्दप्रयोगात् ज्योतिःसंज्ञकयागानां संख्यया कर्मभेदः प्रतिपादितः ।

## IX.2 उद्देश्यम्

प्रियपाठकाः ! अस्मिन् खण्डे भवन्तः अधोलिखितान् विन्दून् आलोचयिष्यन्ति ।

- प्रेक्षणीशब्दस्यार्थं प्रदर्शयितुमर्हन्ति ।
- प्रोक्षणीशब्दस्य यौगिकत्वं निरूपयिष्यन्ति ।
- वैश्वदेवयागोऽष्टानामाग्नेयादियागानां सङ्घ इति प्रतिपादयिष्यन्ति ।
- वैश्वानरशब्दस्यार्थं व्युत्पादयितुम् अर्हन्ति ।
- अष्टकपालादिभिः यागैः द्वादशकपालयागस्य स्तुतिं प्रदर्शयितुमर्हन्ति ।
- ज्योतिरधिकरणे संख्यया कर्मभेदं निरूपयिष्यन्ति ।

## IX.3 **प्रोक्षण्यधिकरणम्** (1-4-9)

प्रोक्षणी संस्कृतिर्जातिर्योगो वा सर्वभूमिषु ।
तथोक्तेः संस्कृतिर्जातिः स्याद्रूढेः प्रबलत्वतः ।।

अन्योन्याश्रयतो नाद्यो न जातिः कल्प्यशक्तितः ।
योगः स्यात् क्लृप्तशक्तित्वात् क्लृप्तिर्व्याकरणाद्भवेत् ।। इति ।।

श्लोकद्वयात्मकमधिकरणमिदं जैमिनीयन्यायमालाविस्तरस्य प्रथमाध्याये चतुर्थपादे नवमाधिकरणे विद्यते ।अत्र " प्रोक्षणीरासादयेति " दर्शपूर्णमासप्रकरणस्थितस्य प्रोक्षणीशब्दस्य यौगिकत्वप्रतिपादनमेव **विषयः** । तत्र प्रोक्षणीशब्दस्य बहुलवैदिकप्रयोगदर्शनात् तस्य संस्कारवाचकत्वं जातिवाचकत्वं योगत्वं वेति **संशयः** । प्रसङ्गेऽस्मिन् **पूर्वपक्षो** वदति यत्–सर्वेषु वैदिकप्रयोगेषु संस्कृतानामपामेव प्रोक्षणीशब्देनोच्यमानत्वात् प्रोक्षणीशब्दः संस्कारवाचक इति एकः पक्षः । पुनश्च लोके जलक्रीडायां " प्रोक्षणीभिरुद्वेजिताः स्म "इति असंस्कृतास्वप्स्वपि प्रयोगात् प्रोक्षणीशब्द उदकजातिविशेषे रूढ इति द्वितीयः पक्षः । प्रकर्षेणोक्ष्यत आभिरितियोगोऽत्र न शङ्कनीयः । यतो हि रूढिर्योगापहारिणी योगाद्रूढिर्बलीयसीति वचनात् ।

परन्तु नैतत्समीचीनम् । यतो हि विहितेष्वभिमन्त्रणादिषु संस्कारेष्वनुष्ठितेषु पश्चात् संस्कृतामपां प्रोक्षणीशब्दव्यपदेशः । तत्प्रवृत्तौ सत्यां प्रोक्षणीशब्देन आपोऽनूद्याभिमन्त्रणादिविधिः । अतोऽत्र अन्योन्याश्रयदोषदर्शनात् प्रोक्षणीशब्दस्य संस्कारत्वं न युक्तम् । पुनश्च नासौ जातिवाचकः ।यतः उदकजातौ प्रोक्षणीशब्दस्य वृद्धव्यवहारे पूर्वमक्लृप्तत्वात् तदर्थं शक्तेः कल्पनीत्वाच्च । प्रोक्षणीशब्दस्य यौगिकत्वं व्याकरणे क्लृप्तम् । तद्यथा–प्रोपसर्गादुक्षसेचने धातोः करणे ल्युट्प्रत्यये कृते प्रोक्षणमिति पदम् । ततः पुनः ङीप्प्रत्यये कृते प्रोक्षणीति शब्दो व्युत्पाद्यते । अर्थात् प्रकर्षेणोक्ष्यते आप आभिरिति व्युत्पत्त्या प्रोक्षणीशब्दः सिध्यति। अतः प्रोक्षणीशब्दो यौगिक इति **सिद्धान्तः** ।

### बोधप्रश्नाः

1. प्रोक्षणीशब्दस्य कोऽर्थः ?
   -----------------
2. प्रोक्षणीशब्दो जातिवाचकः संस्कारवाचकः यौगिको वा ?
   -----------------
3. प्रोक्षणीशब्दः कथं जातिवाचकः ?
   -----------------
4. प्रोक्षणीशब्दस्य का व्युत्पत्तिः ?
   -----------------
5. कोऽन्योन्याश्रयदोषः ?
   -----------------
6. रूढियोगयोर्मध्ये कस्य प्राबल्यम् ?
   -----------------

## IX.4 वैश्वदेवाधिकरणम् , (1-4-11)

चातुर्मास्याद्यपर्व–प्रोक्ताऽऽग्नेयाद्यष्टकान्तिके ।
वैश्वदेवेति शब्दोक्तो गुणः सङ्घस्य नाम वा ।।
नामत्वे रूपराहित्यादविधिर्गुणता ततः ।
अग्न्यादिभिर्विकल्प्यन्ते विश्वदेवासु सप्तसु ।।
अनूद्याष्टौ यजतेति तत् सङ्घे नाम वर्णितम् ।
अविधित्वेऽप्यर्थवत् स्यान्नाम प्राक्प्रवणादिषु ।।
इज्यन्तेऽत्र यजन्ते वा विश्वे देवा इतीदृशी ।
निरुक्तिर्न विकल्पः स्यादुत्पत्त्युत्पन्नशिष्टतः ।।

श्लोकचतुष्टयात्मकमधिकरणमिदं जैमिनीयन्यायमालाविस्तरस्य प्रथमाध्याये चतुर्थपादस्य एकादशाधिकरणे विद्यते । अत्र चातुर्मास्ययागस्य चतुर्षु पर्वसु वैश्वदेव–वरुणप्रघास–साकमेध–शूनासीरीयेषु वैश्वदेवशब्दस्य नामत्वप्रतिपादनं **विषयः** । तत्र **संशयो** यत् वैश्वदेवशब्दो गुणः आग्नेयाद्यष्टसंख्यकयागानां सङ्घस्य नाम वेति ।तत्र **पूर्वपक्षः** प्रतिपादयति यत्–वैश्वदेवपर्वणि आग्नेयद्यष्टौ यागाः प्रतिपादिताः । ते यथा– आग्नेयमष्टकपालं निर्वपति ,सौम्यं चरुम् ,सावित्रं द्वादशकपालम् ,सारस्वतं चरुम् ,पौष्णं चरुम्,मारुतं सप्त–कपालम् , वैश्वदेवीमामिक्षाम् , द्यावापृथिव्यमेककपालम् इति । तेषां चाष्टानां यागानां सन्निधौ वैश्वदेवेन यजतेति आम्नायते । तत्र आग्नेयादियागान् यजेतेत्यनूद्य वैश्वदेवशब्देन देवतारूपो गुणो विधीयते । यद्यपि वैश्वदेवीमामिक्षाम् इत्यत्र विश्वेदेवा देवतात्वेन प्राप्ताः तथाप्याग्नेयादिषु सप्तसु अप्राप्तत्वाद् विधीयन्ते इति । तेषु यदि आग्नेयादिदेवताः सन्ति ,तर्हि तेषु देवता विकल्प्यन्ताम् । नात्र नामधेयत्वं कल्पयितुं शक्यते । यतो हि द्रव्यदेवतयोरभावेन यागस्य स्वरूपाभावात् तत्र श्रूयमाणो विधिः निरर्थकः स्यात् । तस्मादत्र गुणविधिः स्वीकरणीय इति पूर्वपक्षस्याभिप्रायः ।

तत्रोच्यते यत् उत्पत्तिवाक्यविहितानाग्नेयादीनष्टौ यागान् यजेतेति पदेनानूद्य अष्टानां सङ्घे वैश्वदेवशब्दो यागनामत्वेन वर्ण्यते ।विधित्वाभावेऽपि नामोपदेशस्य वैयर्थ्यं नास्ति । वैश्वदेवेन यजेतेत्यादिषु वैश्वदेवशब्देन एकेनैवाष्टानां सङ्घस्य व्यवहृतत्वात् ।आमिक्षायागे विश्वेषां देवानामिज्यमानतया तत्सहितानां सर्वेषां छत्रिन्यायेन वैश्वदेवत्वम् अथवा विश्वेदेवा अष्टानां कर्त्तार इति वैश्वदेवत्वम् । तथाह्युक्तं– यद्विश्वेदेवाः समयजन्त तद्वैश्वदेवस्य वैश्वदेवत्वमिति ।अत्राग्न्यादय उतपत्तिशिष्टत्वात् प्रबलाः । विश्वेदेवा उत्पन्नशिष्टत्वात् दुर्बला। तस्माद् वैश्वदेवशब्दः कर्मनामधेयमिति **सिद्धान्तः** ।

अत्र गुरुमतमपि माधवाचार्य्येणोपन्यस्तम् । तन्मते वैश्वदेवशब्दे गुणनामत्वसन्देहात् तस्याऽप्रामाण्यमिति पूर्वपक्षः । किन्तु तन्न समीचीनम् । भाट्टमतोक्तन्यायेन वैश्वदेवशब्देनाष्टानां यागानां बोधनात् वैश्वदेवशब्देन सङ्घस्य नाम निर्णीयते इति सिद्धान्तः ।

**बोधप्रश्नाः**

1. वैश्वदेवशब्दः गुणः सङ्घस्य नाम वा ?
   -----------------
2. वैश्वदेवसङ्घे केऽष्टौ यागाः ?
   ------------------
3. चातुर्मास्ये कति पर्वाणि ?
   ------------------
4. वैश्वदेवयागः चातुर्मासस्य कतमं पर्व ?
   ------------------
5. उत्पत्तिशिष्टोत्पन्नशिष्टयोः कस्य प्राबल्यम् ?
   ------------------
6. वैश्वदेवशब्दस्य का निरुक्तिः ?
   ------------------

## IX.5 वैश्वानराधिकरणम् (1-4-12)

यद्द्वादशकपालेष्टेर्वैश्वानर्य्या अनन्तरम् ।
श्रुतमष्टाकपालादि तद्गुणो नाम वा स्तुतिः ।।
अन्तर्भावादष्टतादेर्नाम स्यादग्निहोत्रवत् ।
द्रव्यं द्रव्यान्तरे नोचेद् गुणस्तर्हि फले त्वसौ ।।
वाक्यैक्यमुपसंहाराद् विष्पष्टं तत्तु बाधते ।
नानागुणविधौ तस्मादंशद्वारांशिसंस्तुतिः ।।इति।।

श्लोकत्रयात्मकमधिकरणमिदं जैमिनीयन्यायमालाविस्तरस्य प्रथमाध्याये चतुर्थपादस्य द्वादशाधिकरणे विद्यते ।अत्राष्टकपालादिभिरवयवैः द्वादशकपालस्यावयविनः स्तुतिप्रतिपादनं **विषयः** ।अष्टाकपालादियागाः द्वादशकपालयागस्य गुणः नाम स्तुतिर्वेति **संशयः** । प्रसङ्गेऽस्मिन् **पूर्वपक्षः** प्रतिपादयति यत् –"वैश्वानरं

द्वादशकपालं निर्वपेत् पुत्रे जाते ” इति वचनान् द्वादशकपालयागः श्रूयते । तदनन्तरं यदष्टाकपालो भवति गायत्र्यैवेनं ब्रह्मवर्चसेन पुनाति,यन्नवकपालः त्रिवृतैवास्मिन् तेजो दधाति ,यद्दशकपालो विराजैवास्मि- न्नन्नाद्यं दधाति ,यदेकादशकपालः त्रिष्टुभैवास्मिन् इन्द्रियं दधाति , यद् द्वादशकपालो जगत्यैवास्मिन् पशून् दधाति । यस्मिन् जाते एतामिष्टिं निर्वपति ,पूत एव स भवति तेजस्व्यन्नादेन्द्रियपशुमान् भवति । अत्राऽ ष्टत्वादिसंख्या सामान्यतः पुरोडाशादीनां गायत्र्यादिरूपत्वकल्पना कृता । तत्र द्वादशसंख्यायामष्टत्वादि- संख्यानामन्तर्भावात् ताः संख्यानिमित्तीकृत्य अग्निहोत्रशब्दवत् कर्मनामधेयेति एकः पक्षः । पुनश्चात्र अष्टकपालादिशब्दः पुरोडाशद्रव्यपरकः न तु संख्यापरकः । अतः द्रव्यस्य देवतान्तरेऽनन्तर्भावात् नामधेयस्य निमित्तं नास्तीति चेत् तत्र पुरोडाशद्रव्यरूपो गुणो विधीयताम् । न चोत्पत्तिशिष्टद्वादशकपालपुरोडाशाव - रुद्धत्वादष्टकपालादेरनवकाशः स्यात् । ब्रह्मवर्चसादिफलाय तद्विध्युपपत्तेः इत्यपरः पक्षः ।

किन्तु नैतत् समीचीनम् ।यतो हि बहूनां गुणानां विधौ वाक्यभेदापत्तिराशङ्क्यते ।न चैतानि वाक्यानि भिन्नानि । वैश्वानरं द्वादशकपालं निर्वपेदिति विहितस्य यस्मिन् जाते पुत्रे एतामित्युपसंहारेण वाक्यैकत्वावगमात् । तस्मादवयवैरष्टाकपालादिभिरवयवी द्वादशकपालः स्तूयत इति सिद्धान्तः ।

अत्र माधवाचार्य्येण गुरुमतमपि समुपस्थापितम् । यथोक्तं प्रभाकरगुरुणा -

अगुणत्वादनामत्वादमन्त्रत्वादनन्वये ।
अष्टत्वाद्यप्रमाणं चेन्नार्थवादतयान्वयात् ।।इति ।।

अष्टाकपालादीनामगुणत्वात्,अनामत्वात् उत्तमपुरुषप्रयुक्तत्वाद्यभावाच्चामन्त्रत्वात् तेषां द्वादश- कपालयागेन सहानन्वयाच्च तद्वाक्यानामप्रामाण्यमिति **पूर्वपक्षः** । तन्न समीचीनम् । यतः स्तावकत्वेन तेषा- मन्वयसम्भवादिति **सिद्धान्तः** ।

## बोधप्रश्नाः

1. अष्टाकपालादियागानां गुणत्वं नामत्वं स्तुतिर्वा ?
   -----------------
2. कदा वैश्वानरेष्टिरनुष्ठीयते ?
   -----------------
3. नानागुणभेदात् कीदृशो दोषो भवति ?
   -----------------
4. अष्टाकपालयागस्य किं फलम् ?
   -----------------
5. नवकपालयागस्य किं फलम् ?
   -----------------
6. दशकपालयागस्य किं फलम् ?
   -----------------
7. एकादशकपालयागस्य किं फलम् ?
   -----------------
8. द्वादशकपालयागस्य किं फलम् ?
   -----------------

## IX.6 ज्योतिरधिकरणम् (2-2-8)

अथैष ज्यातिरित्यत्र गुणो वा कर्म वा पृथक् ।
गुणः सहस्रदानात्मा ज्योतिष्टोमे ह्यनूदिते ।।
अथेति प्रकृते च्छिन्न एतच्छब्दोऽग्रगं वदेत् ।
संख्ययैवान्यकर्मत्वमिह नूतनसंज्ञया ।। इति ।।

श्लोकद्वयात्मकमधिकरणमिदं जैमिनीयन्यायमालाविस्तरस्य द्वितीयाध्याये द्वितीयपादस्य अष्टमाधिकरणे विद्यते ।अत्र नामभेदात्कर्मभेदविचारो **विषयः** । तत्र **संशयो** यत्–"अथैष ज्योतिरथैष विश्व–ज्योतिरथैष सर्वज्योतिरेतेन सहस्रदक्षिणेन यजेतेति "ब्राह्मणवाक्ये प्रकृते एव ज्योतिष्टोमे सहस्रदक्षिणाख्यो गुणविधिः उत यागान्तरविधिरिति । अत्र **पूर्वपक्ष**स्तावद् वदति यत् –एष ज्योतिरेतेनेति द्वाभ्यामेतच्छब्दाभ्यां प्रकृतं ज्योतिष्टोममनूद्य तत्र गुणविधिः स्वीकरणीय इति ।

परन्तु तन्न समीचीनम् । यतो हि अर्थान्तरद्योतकेनाथशब्देन प्रकृतस्य ज्योतिष्टोमस्य विच्छेदः क्रियते । एतच्छब्दश्चातीतप्रत्यासत्तिंमागामिनीप्रत्यासत्तिश्च बोधयति । तत्राऽतीतायाः प्रत्यासत्ते– र्विच्छेदे सति आगामिप्रत्यासत्तिपरत्वेन एतच्छब्दौ उपपन्नौ । तथापि एककर्मत्वं मा भूत्,कर्मभेदे किं प्रमाण– मिति चेदुच्यते – अपूर्वसंज्ञेति । एष ज्योतिरित्यस्मिन्नुत्पत्तिवाक्ये पूर्वप्रकृतकर्मविषयाया ज्योतिष्टोमसंज्ञाया अन्या ज्योतिरिति संज्ञा श्रूयते । यथा पूर्वाधिकरणे उत्पत्तिवाक्यगतया संख्यया कर्मभेदो निरूपितः तथाऽत्रापि उत्पत्तिवाक्यगतया संज्ञया कर्मभेदोऽवगन्तव्यः इति **सिद्धान्तः**। एतावता माधवाचार्येण ज्योति– रधिकरणं प्रतिपादितम् ।

### बोधप्रश्नाः

1. ज्योतिरधिकरणं किं प्रतिपादयति ?
   -----------------
2. विश्वज्योतियागः सर्वज्योतियागाद् भिन्नो न वा ?
   ------------------
3. ज्योतिरधिकरणेऽथशब्दः किं बोधयति ?
   ------------------
4. ज्योतिष्टोमशब्दस्य कोऽर्थः ?
   ------------------

## IX.7 सारांशः

अस्मिन् खण्डे चत्वारि अधिकरणानि प्रतिपादितानि । तानि यथा- प्रोक्षण्यधि-करणम् , वैश्वानराधिकरणम् , वैश्वदेवाधिकरणम् , ज्योतिरधिकरणश्चेति । तत्र प्रोक्षण्यधिकरणे प्रोक्षणीशब्दस्य जातिवाचकत्वं संस्कारवाचकत्वञ्च निरस्य यौगिकत्वं प्रतिपादितम् ।ततो वैश्वदावाधिकरणे चातुर्मास्ययागस्य चतुर्षु पर्वसु वैश्वदेव-वरुणप्रघास-साकमेध-शूनासीरीयेषु वैश्वदेवशब्दस्य गुणत्वं निरस्य नामत्वं प्रतिपादितम् । तदनु वैश्वानराधिकरणे च अत्राष्टाकपालादिभिरवयवैः द्वादशकपालस्यावयविनः स्तुतिरेव प्रतिपादिता । तदनन्तरञ्च ज्योतिरधिकरणे ज्योतिर्विश्वज्योतिःसर्वज्योतिशब्दैः प्रयुक्तानां यागानां संज्ञया कर्मभेदः माधवाचार्य्येण प्रतिपादितः ।

## IX.8 पारिभाषिकशब्दाः

| | |
|---|---|
| अन्योन्याश्रयः- | परस्पराश्रयः दोषविशेषः |
| अंशः - | अवयवः |
| अंशी - | अवयवी |
| उत्पत्तिशिष्टः- | यस्योत्पत्त्यर्थमुद्यमः क्रियते |
| उत्पन्नशिष्टः - | यः स्वयमेवोत्पद्यते |
| गुणः- | अङ्गम् , शेषम् |
| चातुर्मास्यः - | पर्वचतुष्टययुक्त इष्टिविशेषः |
| जातिः - | सामान्यम् |
| ज्योतिः- | ज्योतिसंज्ञकयागः |
| द्वादशकपालः- | द्वादशसंख्यककपालैः निर्मितः पुरोडाशः |
| प्रोक्षणी- | अभिमत्रितजलस्थापनार्थं कल्पितपात्रविशेषः |
| संस्कृतिः- | संस्कारः |
| योगः- | व्युत्पत्तिसाध्यः |
| रूढिः- | प्रसिद्धिः |
| वरुणप्रघासः- | चातुर्मास्ययागस्य द्वितीयं पर्व |
| विकल्पः - | तुल्यबलविरोधे स्वीकृतो विधिः |
| विश्वज्योतिः- | ज्योतिष्टोमयागविशेषः |
| वैश्वदेवः - | चातुर्मास्ययागस्य प्रथमं पर्व |
| वैश्वानरः- | देवताविशेषः |
| शूनासीरीयः - | चातुर्मास्ययागस्य चतुर्थं पर्व |

| | |
|---|---|
| सर्वज्योतिः – | ज्योतिष्टोमयागविशेषः |
| साकमेधः – | चातुर्मास्ययागस्य तृतीयं पर्व |
| स्तुतिः – | प्रशंसा |

IX.9 आदर्शप्रश्नाः

## निबन्धात्मकप्रश्नाः (प्रत्येकं 20/15 अङ्काः )

१) प्रोक्षण्यधिकरणानुसारेण प्रोक्षणीशब्दस्य यौगिकत्वं प्रतिपादयत ।
२) वैश्वदेवाधिकरणे वैश्वदेवशब्दः गुणवाचकः सङ्घस्य नाम वेति प्रतिपादयत ।
३) वैश्वानरं द्वादशकपालं निर्वपेदित्यत्राष्टाकपालादिभिः द्वादशकपालस्य स्तुतिं प्रदर्शयत ।
४) ज्योतिरधिकरणे संज्ञया कर्मभेदं प्रतिपादयत।

## विश्लेषणात्मकप्रश्नाः (प्रत्येकं 12/10 अङ्काः )

१) प्रोक्षणीशब्दस्य संस्कारवाचकत्वं जातिवाचकत्वञ्च खण्डयत ।
२) वैश्वदेवसङ्घे स्थितानां यागानां विवरणं प्रदत्त ।
३) अष्टाकपालादीनां फलं यथाग्रन्थं प्रतिपादयत ।
४) संज्ञया कर्मभेदमुपस्थापयत ।
५) चातुर्मास्येष्टेः पर्वाणि क्रमेण प्रतिपादयत ।

## लघुप्रश्नाः (प्रत्येकं 5 अङ्काः )

१) प्रोक्षणीशब्दस्य व्युत्पत्तिं प्रदर्शयत ।
२) चातुर्मास्ययागस्य चत्वारि पर्वाणि प्रदर्शयत ?
३) वैश्वानराधिकरणस्य तात्पर्यं प्रतिपादयत ?
४) वैश्वदेवाधिकरणे पूर्वपक्षं प्रतिपादयत ?
५) ज्योतिष्टोमयागस्य स्वरूपं प्रदर्शयत ?

## एकाङ्कप्रश्नाः (प्रत्येकं 1 अङ्कः)

१) प्रोक्षणीशब्दो जातिवाचकः संस्कारवाचकः यौगिको वा ?
२) रूढियोगयोर्मध्ये कस्य प्राबल्यम् ?
३) कस्माद्धातोः प्रोक्षणीशब्दो निष्पन्नः ?
४) वैश्वदेवशब्दः गुणः सङ्घस्य नाम वा ?

५) चातुर्मास्ये कति पर्वाणि ?
६) वैश्वदेवसङ्घे कति यागाः ?
७) वैश्वदेवयागः चातुर्मासस्य कतमं पर्व ?
८) उत्पत्तिशिष्टोत्पन्नशिष्टयोः कस्य प्राबल्यम् ?
९) अष्टाकपालादियागानां गुणत्वं नामत्वं स्तुतिर्वा ?
१०) कदा वैश्वानरेष्टिरनुष्ठीयते ?
११) नानागुणभेदात् कीदृशो दोषो भवति ?
१२) अष्टकपालयागस्य किं फलम् ?
१३) नवकपालयागस्य किं फलम् ?
१४) दशकपालयागस्य किं फलम् ?
१५) एकादशकपालयागस्य किं फलम् ?
१६) द्वादशकपालयागस्य किं फलम् ?
१७) ज्योतिरधिकरणं किं प्रतिपादयति ?
१८) विश्वज्योतियागः सर्वज्योतियागाद् भिन्नो न वा ?
१९) ज्योतिरधिकरणेऽथशब्दः किं बोधयति ?
२०) ज्योतिष्टोमशब्दस्य कोऽर्थः ?

## IX .10 एकाङ्कप्रश्नानामुत्तराणि

१) यौगिकः
२) रूढेः
३) उक्ष सेचने
४) सङ्घस्य नाम
५) चत्वारि
६) अष्टौ
७) प्रथमं
८) उत्पत्तिशिष्टस्य
९) स्तुतिः
१०) पुत्रे जाते
११) वाक्यभेददोषः
१२) ब्रह्मवर्चः
१३) तेजः
१४) अन्नाद्यम्
१५) इन्द्रियम्
१६) पशुः
१७) संज्ञया कर्मभेदम्
१८) भिन्नः

१९) अग्रगम्　　　　　　　　　　२०) यस्मिन् यागे ज्योतिःशब्दस्य वारं वारमावृत्तिः

## UNIT-X (दशमखण्डः) रेवत्यधिकरणम् , यावज्जीवाधिकरणम् ग्रहैकत्वाधिकरणम्, निषादस्थपत्यधिकरणम्

## X.1 प्रस्तावना

जैमिनीयन्यायमालाविस्तरस्यात्रापि चत्वार्य्येवाधिकरणानि विचार्यन्ते । तानि यथा- रेवत्यधिकरणम्,यावज्जीवाधिकरणम्,ग्रहैकत्वाधिकरणम्, निषादस्थपत्यधिकरणश्चेति । अत्रापि प्रत्यधिकरणं विषय-संशय-पूर्वपक्ष-सिद्धान्त इति चतुर्भिः क्रमवृत्तिभिः विचारो माधवाचार्येणोपस्थापितः ।तत्र रेवत्यधि-करणे रेवतीषु ऋक्षु वारवन्तीयनामकसामगानेन पशुफलत्वं प्रतिपादितम्। तदनन्तरं यावज्जीवाधिकरणे जीवननिमित्तकप्रयोगापेक्षया कामनानिमित्तकप्रयोगस्य भेदो निरूपितः । ततश्च ग्रहैकत्वाधिकरणे ग्रहं सम्मार्ष्टिरित्यत्र ग्रहगतैकत्वस्य विवक्षां वाक्यभेदभयान्निरस्य ग्रहगतग्रहत्वस्य विवक्षया समेषां ग्रहपात्राणां सम्मार्जनं प्रतिपादितम् । तदनन्तरं निषादस्थपत्यधिकरणे निषादस्थपतिं याजयेदित्यत्र तत्पुरुषसमासापेक्षया कर्मधारयसमासस्य प्राबल्यात् निषादेन रौद्रयागानुष्ठानं कर्त्तव्यमिति माधवाचार्य्येण प्रतिपादितम् ।

## X.2 उद्देश्यम्

प्रियपाठकाः ! अस्मिन् खण्डे भवन्तः अधोलिखितान् विन्दून् आलोचयिष्यन्ति ।

- रेवतीषु ऋक्षु वारवन्तीयसामगानेन पशुफलप्राप्तिं प्रदर्शयितुमर्हन्ति ।
- सप्तसोमसंस्थासु अग्निष्टोमसोमसंस्थाया विकृतिरग्निष्टुदिति निरूपयिष्यन्ति ।
- यावज्जीवशब्स्यार्थं प्रतिपादयिष्यन्ति ।
- यावज्जीवप्रयोगात्काम्यप्रयोगस्य भेदं प्रतिपादयितुम् अर्हन्ति ।
- सम्मार्ष्टि ग्रहमित्यत्र ग्रहगतैकवचनस्याऽविवक्षां प्रदर्शयितुमर्हन्ति ।
- निषादस्य रौद्रयागानुष्ठानेऽधिकारं निरूपयिष्यन्ति ।

## X.3 रेवत्यधिकरणम् (2-2-12)

उक्ताग्निष्टुतमेतस्य वारवन्तीयसाम हि ।
रेवतीष्वृक्षु कृत्वेति श्रुतं पशुफलाप्तये ।।

रेवत्यादिर्गुणः कर्म पृथग्वा पूर्ववद्गुणः।
रेवतीवारवन्तीयसम्बन्धाख्यः पशुप्रदः ।।
साम्नोऽत्र फलकर्मभ्यां सम्बन्धे वाक्यभिन्नता।
तेनोक्तगुणसंयुक्तमन्यत्कर्मोच्यते फले ।।

श्लोकत्रयात्मकमधिकरणमिदं जैमिनीयन्यायमालाविस्तरस्य द्वितीयाध्याये द्वितीयपादस्य द्वादशाधिकरणे विद्यते ।अत्र त्रिवृदग्निष्टुत्संज्ञके सोमयागे पशुफलाय रेवतीषु ऋक्षु वारवन्तीयनामकं साम गातव्यमिति विचारो **विषयः** । तत्र **संशयो** यत् – त्रिवृदग्निष्टुत्संज्ञकस्यअग्निष्टोमविकृतिरूपस्य एकाह– सम्पाद्यस्य यागस्य "वायव्यासु ऋक्षु एकविंशमग्निष्टोमसाम कृत्वा ब्रह्मवर्चसकामो यजते" इति वाक्यस्य सन्निधावेतस्यैव यागस्य पशुफलाय रेवतीषु ऋक्षु वारवन्तीयसामगानस्योक्तत्वात्;त्रिवृदग्निष्टुत्सोमयागस्य पशुफलाय रेवतीषु ऋक्षु वारवन्तीयसामगानं गुणत्वेन विधीयते अथवा पूर्वस्मात्कर्मणः एतद्गुणसंयुक्तं कर्म पृथगिति ।

प्रसङ्गेऽस्मिन् **पूर्वपक्षो** वदति यत् – यथा "दध्नेन्द्रियकामस्य जुहुयात् "इत्यत्र इन्द्रियफलाय प्रकृतेऽग्निहोत्रे दधि गुणत्वेन विहितं ,तथा प्रकृते त्रिवृदग्निष्टुत्संज्ञके यागे पशुफलाय "रेवतीर्नः सधमाद" इत्यादिषु रेवतीषु ऋचासु वारवन्तीयसंज्ञकसामगानं गुणत्वेन विधीयत इति ।

परन्तु तन्न समीचीनम्।यतो हि विषमदृष्टान्तोऽयम् ।कथमिति चेत् दध्नेन्द्रियकामस्य जुहुया-दित्यत्र दध्नः होमजनकत्वं लोकत एवावगन्तुं शक्यत्वात् न शास्त्रेण बोधनीयम् । केवलं फलसम्बन्धः शास्त्रबोध्यः । अतो न तत्र वाक्यभेदः । परन्त्वत्र रेवतीमन्त्राधारकवारवन्तीयसाम्नः अग्निष्टुत्कर्मसाधनत्वं पशुफलसाधनत्वञ्चेत्युभयस्यापि शास्त्रैकबोध्यत्वात् वाक्यभेदो वारयितुं न शक्यते । तस्मात् पशुफलकं रेवतीषु ऋक्षु वारवन्तीयसामगानगुणविशिष्टं कर्मान्तरं (अग्निष्टुद्यागाद् भिन्नं) विधीयते इति **सिद्धान्तः** । एतावता रेवत्यधिकरणं प्रतिपादितम् ।

### बोधप्रश्नाः

1. त्रिवृद्यागस्य किं स्वरूपम् ?
   ----------------
2. काः सोमसंस्थाः ?
   -----------------
3. त्रिवृदग्निष्टुत्सोमयागे रेवतीषु ऋक्षु वारवन्तीयसामगानेन किं फलम्?
   -----------------
4. रेवत्यधिकरणे कः पूर्वपक्षस्याभिप्रायः ?
   -----------------

## X.4 यावज्जीाधिकरणम् (2-4-1)

यावज्जीवं जुहोतीति धर्मः कर्मणि पुंसि वा ।

कालत्वात्कर्मधर्मोऽतः काम्य एकः प्रयुज्यताम् ।।
न कालो जीवनं तेन निमित्तप्रविभागतः ।
काम्यप्रयोगो भिन्नः स्याद्यावज्जीवप्रयोगतः ।। इति ।।

श्लोकद्वयात्मकमधिकरणमिदं जैमिनीयन्यायमालाविस्तरस्य द्वितीयाध्याये चतुर्थपादस्य प्रथमाधिकरणे विद्यते । अत्र अग्निहोत्रस्य नित्यप्रयोगकाम्यप्रयोगयोः भेदप्रतिपादनं **विषयः** । अत्र" यावज्जीवमग्निहोत्रं जुहोति"इत्यत्राग्निहोत्रस्य नित्यत्वं प्रतिपाद्यते ।"अग्निहोत्रं जुहुयात् स्वर्गकामः"इत्यत्राऽग्निहोत्रस्य काम्यत्वं विधीयते । तत्रायं **संशयो** यत् किं यावज्जीवमित्यनेन अधिकारान्तरं बोध्यते उत काम्याग्निहोत्रे गुणविधिरिति। तदर्थमन्यदपि विचार्य्यते यत् –किं वा यावज्जीवमित्यस्य कर्मधर्म उत पुरुषधर्म इति । तत्र **पूर्वपक्षः** प्रतिपादयति यत् यावज्जीवशब्देन पुरुषायुषपरिमितः कालोऽभिधीयते । काम्येन चाग्निहोत्रेण कालविशेष आकांक्षितो भवति ।तस्य च कालस्यानेन समर्पणादयं कर्मधर्मः। तस्मादत्र गुणविधिः ।अतः काम्यप्रयोगनित्यप्रयोगयोरैक्यमिति ।

परन्तु तन्न समीचीनम् । यतो हि यावज्जीवशब्दो न कालस्य वाचकः अपि तु लक्षकः। वाच्यार्थस्तु कृत्स्नं जीवनम् ।तच्च न कर्मधर्मत्वेन विधातुं शक्यं , तस्य प्राणधारणाभिधानात् पुरुषधर्मत्वात् न कालत्वम् ।न चात्र कर्मभेदः स्वीकर्त्तुं शक्यते तद्धेतूनां शब्दान्तराभ्यासादीनामभावात् । तेन स्वर्गकामनेव जीवनमपि किञ्चिन्निमित्तम् ।तस्मादधिकारान्तरं कल्पनीयम् । तथा सति जीवननिमित्तो नित्यप्रयोगः कामना- निमित्तकश्च कादाचित्कप्रयोगः इत्युभयोः परस्परं भेदोऽङ्गीकर्त्तव्यः। न च जीवननैरन्तर्य्येण प्रयोगनैर- न्तर्य्यापत्तिः , सायंप्रातः कालयोर्विहितत्वात् । तस्माज्जीवनस्य पुरुषधर्मत्वात् नित्यकाम्यप्रयोगौ भिन्नौ इति **सिद्धान्तः** । एतावता यावज्जीवाधिकरणं प्रतिपादितम् ।

### बोधप्रश्नाः

1. यावज्जीवशब्दस्य कोऽर्थः ?

    -----------------

2. नित्याग्निहोत्रं केन वाक्येन विधीयते ?

    ------------------

3. अग्निहोत्रहोमस्य किं फलम् ?

    ------------------

4. कदाऽग्निहोत्रं जुहुयात् ?

    ------------------

## X.5 **ग्रहैकत्वाधिकरणम्** (3-1-7)

संमार्ष्टि ग्रहमित्येको ग्रहः शोध्यः उताखिलः ।

एक उद्देश्यसंख्याया उपादेयवदादरात् ।।
प्राधान्यात्तद्गुणावृत्तेरेकत्वमनपेक्षितम् ।
तद्विधौ वाक्यभेदोऽतो द्रव्योक्त्या सर्वशोधनम् ।। इति ।।

श्लोकद्वयात्मकमधिकरणमिदं जैमिनीयन्यायमालाविस्तरस्य द्वितीयाध्याये चतुर्थपादस्य प्रथमाधिकरणे विद्यते । अत्र "सम्मार्ष्टि ग्रहम्"इत्यत्र ग्रहगतैकत्वस्य विवक्षां वाक्यभेदभयान्निरस्य ग्रहगतग्रहत्वस्य विवक्षया समेषां ग्रहपात्राणां सम्मार्जनविधानप्रतिपादनं **विषयः** । दशापवित्रेण ग्रहं संमार्ष्टि इत्यत्र एकं ग्रहपात्रं सम्मार्जनीयमथवा सर्वाणि ग्रहपात्राणीति **संशयः** । यथा पशुना यजेतेत्यत्र उपादेय- पशुगतमेकत्वं विवक्षितं तथा तदुद्देश्यगतमप्येकत्वं विवक्षितव्यम् ।यतो हि ग्रहशब्दस्य जाति वाचकत्वेन जातेः संस्कार्यत्वे सति तदाश्रयभूते यस्मिन् कस्मिनपि द्रव्येऽनुष्ठितेन संस्कारेण जातिः संस्कृता भवति । तस्मादेकमेव ग्रहपात्रं संमार्जनीयमिति **पूर्वपक्षः** ।

परन्तु नैतत् समीचीनम् । तत्र ग्रहमित्यत्र द्वितीयाविभक्त्या ग्रहस्योद्देश्यत्वात् प्रयोजनवत्त्वाच्च प्राधान्यम् । ग्रहं प्रति सम्मार्जनं गुणः । "प्रति प्रधानं गुण आवर्त्तनीय " इति न्यायेन तत्र यावन्तो ग्रहाः सन्ति तेषां समेषां सम्मार्गः कर्त्तव्यः । एवं निश्चये सति सम्मार्जयितव्यग्रहस्योद्देश्यगतमेकत्वं श्रूयमाणमपि न विवक्षितम् । तत्र यदि उच्येत यत् नेदमुद्देश्यगतम् अपि तु स्वयं विधेयं, तर्हि ग्रहं समृज्यात् तं चैकम् इत्येवं वाक्यभेदः प्रसज्येत । पशुना यजेतेत्यत्र तु यागं प्रति पशुः गुणभूतः । न हि प्रति गुणं प्रधानस्यावृत्तिः करणीयेति कश्चिन्नियमोऽस्ति । अतोऽत्र श्रूयमाणमेकत्वं विवक्षितम् । न च जातिः संस्कार्या ,तस्याः खलु अमूर्त्तत्वात् । ततः जातिद्वारा ग्रहशब्दः द्रव्यलक्षको भवति ,तस्मात्तत्रावृत्तिरुक्ता ।तस्मात् सर्वाणि ग्रहपात्राणि सम्मार्जनीयानीति **सिद्धातः** ।

### बोधप्रश्नाः

1. ग्रहं सम्मार्ष्टि इत्यत्र पूर्वपक्षस्य कोऽभिप्रायः ?
   -----------------
2. पशुना यजेतेत्यत्र पशुगतमेकत्वं विवक्षितं न वा ?
   ------------------
3. ग्रहशब्स्य कोऽर्थः ?
   ------------------
4. प्रति प्रधानं गुणावृत्तिः प्रति गुणं प्रधानावृत्तिर्वा ?
   ------------------
5. उद्देश्यविधेययोः को भेदः ?
   ------------------

## X.6 **निषादस्थपत्यधिकरणम्** (6-1-13)

द्विजः स्थपतिरन्यो वा द्विजः षष्ठीसमासतः ।
कर्मधारयमुख्यत्वान्निषादो रौद्रयागकृत् ।

एकश्लोकात्मकमधिकरणमिदं जैमिनीयन्यायमालाविस्तरस्य षष्ठाध्याये प्रथमपादस्य त्रयो-दशाधिकरणे विद्यते । अस्मिन्नधिकरणे निषादस्य रौद्रयागाधिकारो **विषयः** । वास्तुमयं रौद्रं चरुं निर्वपेदित्यत्र श्रूयते यत् "एतया निषादस्थपतिं याजयेदिति" ।वास्तुशब्देन किञ्चित् प्रकृतिद्रव्यविशेषो बोध्यते । एतस्यामिष्टौ अधिकारी द्विजस्थपतिः निषादस्थपतिर्वेति **संशयः** । तत्र **पूर्वपक्षो** वदति यत् निषादानां स्थपतिरिति षष्ठीसमासाश्रयणात् त्रैवर्णिके तस्याधिकारसम्भवात् ,तस्याचाधीतवेदत्वेन विद्यासम्भवात् द्विज एवाधिकारीति ।

परन्तु नैतत् समीचीनम् । यतः निषादस्थपतिरित्यत्र निषादश्चासौ स्थपतिश्चेति कर्मधारय-समासः समाश्रयितुं शक्यते । स च समासः तत्पुरुषसमासापेक्षया दुर्बलः ।अतो निषादजाति-विशिष्टस्थपतिस्तत्र बोध्यते । निषादस्तु ब्राह्मणात् शूद्रायामुत्पादितः सङ्कीर्णजातिविशेषः।षष्ठीसमासे सङ्कीर्णजातिविशेषवाचिना निषादशब्देन स्थपतेः सम्बन्ध उपलक्ष्यते । कर्मधारये तु तादृशो दोषो नास्ति । ततः तात्कालिकाचार्योपदेशादिना विद्यां सम्पाद्य धनिकः कश्चिन्निषादः रौद्रयागं कुर्य्यादिति **सिद्धान्तः** ।

### बोधप्रश्नाः

1. निषादशब्देन को बोध्यते ?
   -----------------
2. निषादस्थपतिरित्यत्र कः समासः समीचीनः ?
   -----------------
3. रौद्रयागे निषादस्याधिकारोऽस्ति न वा ?
   -----------------
4. वास्तुशब्देन किं बाध्यते ?
   -----------------
5. कर्मधारय–तत्पुरुषसमासयोः कस्य प्राधान्यम् ?
   -----------------

## X.7 सारांशः

अस्मिन् खण्डे चत्वारि अधिकरणानि प्रतिपादितानि । तानि यथा– रेवत्यधि-करणम् ,यावज्जीवाधिकरणम् ,ग्रहैकत्वाधिकरणम् ,निषादस्थपत्यधिकरणञ्चेति । तत्र रेवत्यधिकरणे रेवतीषु ऋक्षु वारवन्तीयसामगानगुणविशिष्टं कर्मान्तरं (अग्निष्टुद्यागाद् भिन्नं) पशुफललाभाय प्रतपादितम् । तदनन्तरं

यावज्जीवाधिकरणे जीवनस्य पुरुषधर्मत्वात् नित्याग्निहोत्र–काम्याग्निहोत्रप्रयोगयोः भेदः प्रतिपादितः। ततो ग्रहैकत्वाधिकरणे सम्मार्ष्टि ग्रहमित्यत्र ग्रहगतैकत्वविवक्षां निरस्य ग्रहगतं ग्रहत्वमेव विवक्षितमिति प्रति– पादितम् ।तदनु निषादस्थपत्यधिकरणे निषादस्थपतिं याजयेदित्यत्र निषादानां स्थपतिरिति षष्ठीतत्पुरुष– समासं खण्डयित्वा निषादश्चासौ स्थपतिश्चेति कर्मधारयसमासाश्रयणेन निषादस्य रौद्रयागाधिकारः प्रतिपादितः। एवं प्रकारेण माधवाचार्य्येण विषय–संशय–पूर्वपक्ष–सिद्धान्त इति चतुर्भिः क्रमवृत्तिभिरेतेषा– मधिकरणानां प्रतिपादनं सम्यक्तया कृतम् ।

## X.8 पारिभाषिकशब्दाः

अग्निष्टुत् – अग्निष्टोमयागस्य विकृतियागविशेषः
अग्निष्टोमः – सप्तसु सोमसंस्थास्वन्यतमः
अग्निहोत्रम् – सायंप्रातः क्रियमाणो होमविशेषः
उद्देश्यम् – यदुद्दिश्य किञ्चिद् विधीयते
एकाहः– दीक्षोपसदामनेकदिनानुष्ठेयत्वे सति यत्रैकस्मिन् दिने सोमरसेन हवनं स यागः
कर्मधारयः– परपदप्रधानरूपः समासः
काम्यप्रयोगः – फलोद्देश्येन क्रियमाणः प्रयोगः
गुणविधिः– प्राप्तं कर्माश्रित्य द्रव्यदेवतादिविधायको विधिः
ग्रहः– यज्ञे व्यवहृतः पात्रविशेषः
तत्पुरुषः– पूर्वपदप्रधानरूपः समासः
त्रिवृत् – पृष्ठस्तोत्रे त्रिवृत्स्तोमयुक्तः यागः
द्विजः– त्रैवर्णिकः, द्विजातिः
नित्यप्रयोगः– यस्य प्रयोगस्याननुष्ठानेन प्रत्यवायः
निषादः– ब्राह्मणात् शूद्रायामुत्पादितः सङ्कीर्ण– जातिविशेषः।
निषादस्थपतिः – निषादश्चासौ स्थपतिश्चेति
रेवती– रेवतीर्नः सधमाद इत्यादि ऋचः
रौद्रयागः– रुद्रदेवताकः चरुयागः
वाक्यभेदः– एकमुद्दिश्य द्वयोर्विधाने सृष्टो दोषविशेषः
वारवन्तीयसाम – साम्नः संज्ञाविशेषः
वास्तु– किञ्चित् प्रकृतिद्रव्यविशेषः

| | |
|---|---|
| विधेयम्– | कर्मोद्दिश्य विधानयोग्यं द्रव्यादिकम् |
| स्थपतिः – | शिल्पी ,रथकारजातिविशेषः |

## X.9 आदर्शप्रश्नाः

### निबन्धात्मकप्रश्नाः (प्रत्येकं 20/15 अङ्काः )

१) रेवत्यधिकरणे पशुफलाय वारवन्तीयसामगानस्य गुणत्वं पृथक्कर्मत्वं वेति प्रतिपादयत ।
२) यावज्जीवाधिकरणानुसारेण नित्याग्निहोत्रप्रयोगात् काम्यप्रयोगस्य भेदं प्रतिपादयत ।
३) ग्रहैकत्वाधिकरणे ग्रहगतैकत्वस्य विवक्षास्ति न वेति प्रदर्शयत ।
४) निषादस्थपतिं याजयेदित्यत्र निषादस्य रौद्रयागेऽधिकारोऽस्ति न वेति विचारयत ।

### विश्लेषणात्मकप्रश्नाः (प्रत्येकं 12/10 अङ्काः )

१) रेवत्यधिकरणस्य तात्पर्य्यं प्रतिपादयत ।
२) " यावज्जीवमग्निहोत्रं जुहोति ", "अग्निहोत्रं जुहुयात् स्वर्गकाम "इत्यनयोः प्रयोगभेदं दर्शयत ।
३) सम्मार्ष्टि ग्रहमित्यत्र ग्रहगतमेकत्वं खण्डयत ।
४) निषादस्य रौद्रयागाधिकारितां प्रतिपादयत ।

### लघुप्रश्नाः (प्रत्येकं 5 अङ्काः )

१) यावज्जीवमिति शब्दस्य तात्पर्यं प्रदर्शयत ।
२) अग्निहोत्रहोमस्य कालं प्रदर्शयत ?
३) निषादस्थपतिपदे समासं निरूपयत ?
४) रेवत्यधिकरणे पूर्वपक्षं प्रतिपादयत ?
५) सम्मार्ष्टि ग्रहमित्यत्र किं विवक्ष्यते ?
६) त्रिवृद्यागस्य किं स्वरूपम् ?
७) काः सोमसंस्थाः ?

### एकाङ्कप्रश्नाः (प्रत्येकं 1 अङ्कः)

१) वारवन्तीयं कस्य संज्ञा ?
२) अग्निष्टुद्यागः कस्य विकृतिः ?
३) रेवतीषु वारवन्तीयं साम किमर्थं गायते ?
४) यावज्जीवशब्दः कालस्य वाचको लक्षको वा ?
५) नानागुणभेदात् कीदृशो दोषो भवति ?

६) नित्याग्निहोत्रं केन वाक्येन विधीयते ?
७) अग्निहोत्रहोमस्य किं फलम् ?
८) काम्याग्निहोत्रं केन वाक्येन प्राप्यते ?
९) कदाऽग्निहोत्रं जुहुयात् ?
१०) पशुना यजेतेत्यत्र पशुगतमेकत्वं विवक्षितं न वा ?
११) प्रति प्रधानं गुणावृत्तिः प्रति गुणं प्रधानावृत्तिर्वा ?
१२) निषादशब्देन को बोध्यते ?
१३) निषादस्थपतिरित्यत्र कः समासः समीचीनः ?
१४) रौद्रयागे निषादस्याधिकारोऽस्ति न वा ?
१५) वास्तुशब्देन किं बोध्यते ?
१६) कर्मधारय–तत्पुरुषसमासयोः कस्य प्राधान्यम् ?
१७) कः स्थपतिः ?
१८) कति सोमसंस्था ?
१९) क एकाहः ?
२०) रौद्रयागे किं द्रव्यम् ?

## X .10 एकाङ्कप्रश्नानामुत्तराणि

| | |
|---|---|
| १) सामविशषस्य | २) अग्निष्टोमस्य |
| ३) पशुफलार्थम् | ४) लक्षकः |
| ५) वाक्यभेदः | ६) यावज्जीवमग्निहोत्रं जुहोति |
| ७) स्वर्गः | ८) अग्निहोत्रं जुहुयात् स्वर्गकाम |
| ९) सायं प्रातः | १०) न |
| ११) प्रति प्रधानं गुणावृत्तिः | १२) सङ्कीर्णजातिविशेषः |
| १३) कर्मधारय | १४) अस्ति |
| १५) किञ्चित् प्रकृतिद्रव्यविशेषः | १६) कर्मधारयस्य |
| १७) रथकारजातिविशेषः | १८) सप्त |
| १९) एकदिनसाध्यः सोमयागविशेषः | २०) चरुः |

***************